# शान्तिपाठः

सह नाववतु। सह नौ भुनक्तु।

सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु मा विद्विषावहै॥

ॐ शान्तिः शान्तिः शान्ति ः॥

स ह नाववतु।

नौ शिष्याचार्यौ सहैव अवतु रक्षतु।

सह नौ भुनक्तु भोजयत।

सह वीर्यं विद्यानिमित्तं सामर्थ्यं करवावहै निर्वर्तयावहै।

तेजस्वि नौ आवयोः तेजस्विनोः अधीतम्, स्वधीतम् अस्तु अर्थ-ज्ञान-योग्यमस्तु इत्यर्थः।

मा विद्विषावहै विद्या-ग्रहण-निमित्तं शिष्यस्य आचार्यस्य वा प्रमादकृताद् अन्यायात् अपराधाद् विद्वेषः प्राप्तः

तच्छमनाय इयम् आशीः।

माविद्विषावहै इति। मैव इतरेतरं द्वेषमापद्यावहै।

शान्तिः शान्तिः शान्तिरिति त्रिर्वचनम् उक्तार्थम् वक्ष्यमाण-विद्या-विघ्न-प्रशमनार्था च इयं शान्तिः।

अविघ्नेन ह्यात्म-विद्या-प्राप्तिः आशास्यते।

तन्मूलं हि परं श्रेयः।

ओम् नमो भगवते वैवस्वताय मृत्यवे ब्रह्मविद्याचार्याय नचिकेतसे च।।

अथ काठकोपनिषद्ववल्लीनां सुखार्थ-प्रबोधनार्थम् अल्प-ग्रन्था वृत्तिरारभ्यते।

सदेर्धातोः विशरण-गत्यवसादनार्थस्य उप-नि-पूर्वस्य क्विप्-प्रत्ययान्तस्य रूपमुपनिषदिति।

उपनिषच्छब्देन च व्याचिख्यासित-ग्रन्थ-प्रतिपाद्य-वेद्य-वस्तु-विषया विद्योच्यते।

केन पुनः अर्थ-योगेन उपनिषच्छब्देन विद्योच्यते इत्युच्यते।

ये मुमुक्षवः दृष्टानुश्रविक-विषय-वितृष्णाः सन्त उपनिषच्छब्द-वाच्यां वक्ष्यमाण-लक्षणां विद्यामुपसद्योपगम्य तन्निष्ठतया निश्चयेन शीलयन्ति तेषामविद्यादेः संसार-बीजस्य विशरणाद्धिंसनाद् विनाशनादित्यनेनार्थयोगेन विद्या उपनिषदिति उच्यते। तथा च वक्ष्यति निचाय्य तं मृत्यु-मुखात् प्रमुच्यते (क. १.३.१५)।

पूर्वोक्त-विशेषणान्मुमुक्षून् वा परं ब्रह्म गमयतीति ब्रह्म-गमयितृत्वेन योगाद् ब्रह्म-विद्योपनिषत्। तथा च वक्ष्यति ब्रह्म-प्राप्तो विरजोऽभूद्विमृत्युः (क. २.३.१८) इति।

लोकादिः ब्रह्मजज्ञः योऽग्निस्तद्विषयाया विद्याया द्वितीयेन वरेण प्रार्थ्यमानायाः स्वर्ग-लोक-फल-प्राप्ति-हेतुत्वेन गर्भ-वास-जन्म-जराद्युपद्रव-वृन्दस्य लोकान्तरे पौनःपुन्येन प्रवृत्तस्य अवसादयितृत्वेन शैथिल्यापादनेन धात्वर्थयोगाद अग्नि-विद्याप्युपनिषद् इत्युच्यते। तथा च वक्ष्यति स्वर्गलोका अमृतत्वं भजन्ते (क. १.१.१३) इत्यादि।

ननु च उपनिषच्छब्देन अध्येतारः ग्रन्थमप्यभिलपन्ति। उपनिषदमधीमहे  अध्यापयामः इति च।

एवं नैष दोषः। अविद्यादि-संसार-हेतु-विशरणादेः सदि-धात्वर्थस्य ग्रन्थ-मात्रे असम्भवाद् विद्यायां च सम्भवात्। ग्रन्थस्यापि तादर्थ्येन तच्छब्दत्वोपपत्तेः। आयुर्वै घृतम् (तै.सं २.३.११) इत्यादिवत्। तस्माद् विद्यायां मुख्यया वृत्त्या उपनिषच्छब्दः वर्त्तते, ग्रन्थे तु भक्त्या इति।

एवमुपनिषच्छब्द-निर्वचनेनैव विशिष्टोऽधिकारी विद्यायामुक्तः।

विषयश्च विशिष्ट उक्तः विद्यायाः परं ब्रह्म प्रत्यगात्म-भूतम्।

प्रयोजनं च अस्या उपनिषदः आत्यन्तिकी संसार-निवृत्तिः ब्रह्म-प्राप्ति-लक्षणा।

सम्बन्धश्च एवं-भूत-प्रयोजनेन उक्तः।

अतो यथोक्ताधिकारि-विषय-प्रयोजन-सम्बन्धायाः विद्यायाः कर-तल-न्यस्तामलकवत् प्रकाशकत्वेन विशिष्टाधिकारि-विषय-प्रयोजन-सम्बन्धा एता वल्ल्यो भवन्ति इत्यतः ता यथा-प्रतिभानं व्याचक्ष्महे।

तत्र आख्यायिका विद्या-स्तुत्यर्था।

ॐ श्रीगणपतये नमः।

ॐ श्रीगुरुभ्यो नमः।

## प्रथमोऽध्यायः प्रथमावल्ली

**उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ। तस्य ह नचिकेता नाम पुत्र आस।।**

**१.१.१ ।।**

उशन् वाजश्रवसः ह वै (विश्वजिता यागेन इजे इति शेषः) (तस्मिन् क्रतौ) सर्ववेदसं ददौ। तस्य ह नचिकेताः नाम पुत्रः आस।। १
वाजश्रवाः (सकारान्तशब्दः)। कित् इच्छायाम् १ प.प.

उशन् कामयमानः ह वा इति वृत्तार्थ-स्मरणार्थौ निपातौ। वाजमन्नं तद्धानादि-निमित्तं श्रवो यशो यस्य स वाजश्रवा रूढितो वा। तस्यापत्यं वाजश्रवसः किल विश्वजिता सर्व-मेधेन ईजे तत्फलं कामयमानः।

स तस्मिन् क्रतौ सर्ववेदसं सर्वस्वं धनं ददौ दत्तवान्।

तस्य यजमानस्य ह नचिकेता नाम पुत्रः किल आस बभूव।। १।।

**आनन्दगिरिटीका**

वश कान्तौ इत्यस्य शत्रन्तं रूपम् उशन् इति। श्रवः कीर्त्तिः। सर्वमेधेन - सर्वस्वदक्षिणेन ईजे यजनं कृतवान् इत्यर्थः। (१)

**त ँ्ह कुमार ँ्सन्तं दक्षिणासु नीयमानासु श्रद्धाविवेश सोऽमन्यत।। १.१.२ ।।**

श्रद्धा आस्तिक्यबुद्धिः। अतिबाले पुत्रे स्नेहवशात् शोभना गाः पुत्रधनत्वेन कल्पयित्वा वृद्धाः गाः स्वधनत्वेन मत्वा स्वधनं वृद्धगोलक्षणं ददौ।

तं ह नचिकेतसं कुमारं प्रथम-वयसं सन्तम् अप्राप्त-प्रजनन-शक्तिं बालमेव श्रद्धा आस्तिक्य-बुद्धिः, पितुः

हित-काम-प्रयुक्ता आविवेश प्रविष्टवती।

कस्मिन् काले इत्याह - ऋत्विग्भ्यः सदस्येभ्यश्च दक्षिणासु नीयमानासु विभागेन उपनीयमानासु

दक्षिणार्थासु गोषु।

सः आविष्ट-श्रद्धः नचिकेता अमन्यत।। २ ।।

**आनन्दगिरिटीका**

सदसि यज्ञसभायां ये अन्ये मिलिताः ब्राह्मणाः तेभ्यश्च। (२)

**पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः।**

**अनन्दा नाम ते लोकास्तान्स गच्छति ता ददत्।। १.१.३ ।।**

पीतोदकाः जग्धतृणाः दुग्धदोहाः निरिन्द्रियाः ताः ददत् सः ये लोकाः अनन्दाः नाम (ते इति स्थाने ये इति पठितव्यम्) तान् गच्छति ।। ३

पीतोदका इत्यादिना दक्षिणार्था गावः विशेष्यन्ते।

पीतोदकाः पीतमुदकं याभिस्ताः पीतोदकाः।

जग्धतृणाः जग्धं भक्षितं तृणं याभिस्ता जग्ध-तृणाः।

दुग्धदोहाः दुग्धः दोहः क्षीराख्यः यासां ता दुग्ध-दोहाः।

निरिन्द्रियाः अप्रजनन-समर्था जीर्णा निष्फला गावः इत्यर्थः।

याः ताः एवं-भूताः गाः ऋत्विग्भ्यः दक्षिणा-बुद्ध्या ददत् प्रयच्छन् अनन्दाः अनानन्दाः असुखा नाम नामान

इत्येतत्।

ये ते लोकाः तान् सः यजमानः गच्छति।। ३ ।।

**आनन्दगिरिटीका**

पीतमुदकं प्रागेव नोत्तरकालं पानशक्तिरपि अस्तीत्यर्थः। (३)

**स होवाच पितरं तत कस्मै मां दास्यसीति।**

**द्वितीयं तृतीयं तँ्होवाच। मृत्यवे त्वा ददामीति।। १.१.४ ।।**

सः ह पितरम् उवाच तत मां कस्मै दास्यसीति। द्वितीयं तृतीय्म् (अपि उवाच)। (पिता) तं होवाच। त्वा मृत्यवे ददामीति।।४।।

तदेवं क्रत्वसम्पत्ति-निमित्तं पितुरनिष्टं फलं मया पुत्रेण सता निवारणीयम् आत्म-प्रदानेनापि क्रतु-सम्पत्तिं कृत्वा इत्येवं मत्वा पितरमुपगम्य स होवाच पितरम्।

हे तत तात, कस्मै ऋत्विग्-विशेषाय दक्षिणार्थं मां दास्यसि प्रयच्छसि इति एतत्। एवमुक्तेन पित्रा उपेक्ष्यमाणोऽपि द्वितीयं तृतीयम् अपि उवाच कस्मै मां दास्यसि कस्मै मां दास्यसि इति।

नायं कुमार-स्वभाव इति क्रुद्धः सन् पिता तं ह पुत्रं किल उवाच मृत्यवे वैवस्वताय त्वा त्वां ददामीति।।

४ ।।

स एवमुक्तः पुत्र एकान्ते परिदेवयाञ्चकार। कथम्। इत्युच्यते -

**बहूनामेमि प्रथमः। बहूनामेमि मध्यमः।**

**किँ्स्विद्यमस्य कर्त्तव्यं यन्मयाद्य करिष्यति।। १.१.५ ।।**

बहूनाम् (मध्ये) प्रथमः (सन्) (मुख्यया वृत्त्या) एमि। बहूनाम् मध्यमः (सन्) (मध्यमया वृत्त्या) एमि। (अतः गुणवतः मम त्यागः अयुक्तः इति भावः)। (किंच) यमस्य किंस्वित् कर्त्तव्यम् (अस्ति) यत् (पिता) मया (दत्तेन) अद्य करिष्यति।।५।।

बहूनां शिष्याणां पुत्रणां वा एमि गच्छामि प्रथमः सन्मुख्यया शिष्यादि-वृत्त्या इत्यर्थः।

मध्यमानां च बहूनां मध्यमः मध्यमयैव वृत्त्या एमि।

नाधमया कदाचिदपि। तमेवं विशिष्ट-गुणमपि पुत्रं मां मृत्यवे त्वा ददामिइत्युक्तवान् पिता।

स किंस्विद्यमस्य कर्त्तव्यं प्रयोजनं मया प्रत्तेन करिष्यति यत् कर्त्तव्यम् अद्य। नूनं प्रयोजनमनपेक्ष्यैव क्रोध-

वशादुक्तवान् पिता।। ५ ।।

**आनन्दगिरिटीका**

यथावसरं गुरोरिष्टं ज्ञात्वा शुश्रूषणे प्रवृत्तिः मुख्या। आज्ञावशेन मध्यमा। तदपरिपालनेन अधमा। मया दत्तेन यत् कर्त्तव्यम् अद्य यमस्य करिष्यति तत् किं कर्त्तव्यं आसीद्, नासीदेव विधानाभावात्।

तथापि तत्पितुः वचो मृषा मा भूदित्येवं मत्वा परिदेवना-पूर्वकमाह पितरं शोकाविष्टं किं मयोक्तम् इति -

**अनुपश्य यथा पूर्वे। प्रतिपश्य तथापरे।**

**सस्यमिव मर्त्यः पच्यते। सस्यमिवाजायते पुनः।। १.१.६ ।।**

यथा पूर्वे (वृत्ताः) (तान्) अनुपश्य। तथा अपरे प्रतिपश्य। सस्यमिव मर्त्यः पच्यते। (मृत्वा च) सस्यमिव पुनः आजायते ।।६।।

अनुपश्य आलोचय निभालय अनु क्रमेण यथा येन प्रकारेण वृत्ताः पूर्वे अतिक्रान्ताः पितृ-पितामहादयः

तव। तान् दृष्ट्वा च तेषां वृत्तमास्थातुमर्हसि।

वर्त्तमानाश्च अपरे साधवो यथा वर्त्तन्ते तांश्च प्रतिपश्य आलोचय तथा।

न च तेषु मृषा-करणं वृत्तं वर्त्तमानं वा अस्ति।

तद्विपरीतमसतां च वृत्तं मृषा-करणम्।

न च मृषा कृत्वा कश्चिदजरामरो भवति।

यतः सस्यम् इव मर्त्यः मनुष्यः पच्यते जीर्णो म्रियते।

मृत्वा च सस्यम् इव आजायते आविर्भवति पुनः।

एवमनित्ये जीव-लोके किं मृषा-करणेन। पालय आत्मनः सत्यम्, प्रेषय मां यमाय इत्यभिप्रायः।। ६ ।।

**वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान्।**

**तस्यैताँ्‌ शान्तिं कुर्वन्ति। हर वैवस्वतोदकम्।। १.१.७ ।।**

ब्राह्मणः अतिथिः वैश्वानरः इव गृहान् प्रविशति। तस्य एतां शान्तिं कुवन्ति (शिष्टजनाः) (अतः त्वमपि) हे वैवस्वत उदकम् हर ।। ७ ।।

वैश्वानरः अग्निरेव साक्षात् प्रविशति अतिथिः सन् ब्राह्मणो गृहान् दहन् इव।

तस्य दाहं शमयन्तः इव अग्नेः एतां पाद्यासनादि-दान-लक्षणां शान्तिं कुर्वन्ति सन्तः अतिथेः यतः, अतः हर

आहर हे वैवस्वत उदकम् नचिकेतसे पाद्यार्थम्।

यतश्च अकरणे प्रत्यवायः श्रूयते।। ७ ।।

**आनन्दगिरिटीका**

श्रुत्यनुक्तपूर्वभाषणादिकमपि कथायामपेक्षितं पूरयति - **स एवमुक्तः पिता** इति। (७)

**आशाप्रतीक्षे सङ्गतँ्सूनृतां च इष्टापूर्ते पुत्रपशूँ्श्च सर्वान्।**

**एतद्वृङ्क्ते पुरुषस्याल्पमेधसः यस्यानश्नन् वसति ब्राह्मणो गृहे।। १.१.८ ।।**

यस्य अल्पमेधसः गृहे ब्राह्मणः अनश्नन् वसति (तस्य) पुरुषस्य आशाप्रतीक्षे संगतं सूनृतां इष्टापूर्ते च सर्वान् पुत्रपशून् च । एतत् (सर्वम्) वृङ्क्ते ।। ८।।

आशा च प्रतीक्षा च आशाप्रतीक्षे। इष्टं च पूर्तं च इष्टापूर्ते[1]। पुत्रान् च पशून् च। अल्पा मेधा यस्य सः। वृञ्ज् वर्जन् २ आ.प ७ प.प. १ प.प.।

अतिथिर्तिष्ठति द्वारे अपो गृह्णाति यो नरः।

आपोशनं सुरापानं अन्नं गोमांसभक्षणम्।।

आशाप्रतीक्षे अनिर्ज्ञात-प्राप्येष्टार्थ-प्रार्थना आशा।

निर्ज्ञात-प्राप्यार्थ-प्रतीक्षणं प्रतीक्षा।

ते आशा-प्रतीक्षे।

सङ्गतं तत्संयोगजं फलम्।

सूनृतां च सूनृता हि प्रिया-वाक्, तन्निमित्तं च।

---

[1] वापीकूपतडागादि देवतायतनानि च । अन्नप्रदानमारामः पूर्तमित्यभिधीयते ।।
अग्निहोत्रं तपः सत्यं वेदानां चानुपालनम् । आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते ।।

इष्टापूर्त्ते इष्टं यागजं, पूर्त्तम् आरामादि-क्रियाजं फलम्।

पुत्रपशूंश्च पुत्रांश्च पशूंश्च सर्वान्

एतत् सर्वं यथोक्तं

वृङ्क्ते आवर्जयति विनाशयति इत्येतत्।

पुरुषस्य अल्पमेधसः अल्प-प्रज्ञस्य यस्य

अनश्नन् अभुञ्जानः ब्राह्मणो गृहे वसति।

तस्माद् अनुपेक्षणीयः सर्वावस्थास्वप्यतिथिः इत्यर्थः।। ८ ।।

एवमुक्तो मृत्युरुवाच नचिकेतसं समुपगम्य पूजा-पुरस्सरम् -

**तिस्रो रात्रीः यदवात्सीर्गृहे मे अनश्नन् ब्रह्मन् अतिथिर्नमस्यः।**

**नमस्तेऽस्तु ब्रह्मन्स्वस्ति मेऽस्तु। तस्मात्प्रति त्रीन्वरान् वृणीष्व।। १.१.९ ।।**

ब्रह्मन् ते नमः अस्तु। मे स्वस्ति अस्तु। ब्रह्मन् नमस्यः अतिथिः (सन्) यत् मे गृहे अनश्नन् तिस्रो रात्रीः अवात्सीः तस्मात् प्रति त्रीन् वरान् वृणीष्व।। ९।।
नमस्कारार्हः उ नमस्यः। प्रति त्रीन् उ रात्रिप्रतिरूपान्।

**भाष्यम्**

तिस्रो रात्रीः यद् यस्माद् अवात्सीः उषितवान् असि गृहे मे मम अनश्नन् हे ब्रह्मन् अतिथिः सन्

नमस्यः नमस्कारार्हश्च।

तस्माद् नमः ते तुभ्यम् अस्तु भवतु।

हे ब्रह्मन् स्वस्ति भद्रं मेऽस्तु।

तस्माद् भवतोऽनशनेन मद्-गृह-वास-निमित्ताद् दोषात् तत्प्राप्त्युपशमेन।

यद्यपि भवदनुग्रहेण सर्वं मम स्वस्ति स्यात् तथापि त्वदधिक-सम्प्रसादनार्थम् अनशनेन उषितामेकैकां रात्रिं

प्रति त्रीन् वरान् वृणीष्व अभिप्रेतार्थ-विशेषान् प्रार्थयस्व मत्तः।। ९ ।।

नचिकेतास्त्वाह -

**शान्तसङ्कल्पः सुमना यथा स्याद् वीतमन्युर्गोतमो माऽभि मृत्यो।**

**त्वत्प्रसृष्टं माऽभिवदेत् प्रतीतः। एतत् त्रयाणां प्रथमं वरं वृणे।। १.१.१० ।।**

गौतमः शान्तसङ्कल्पः सुमनाः यथा स्याद्, मा अभि वीतमन्युः (यथा स्याद्), मृत्यो त्वत्प्रसृष्टं मा अभिप्रतीतः सन् वदेत्। एतत् त्रयाणां प्रथमं वरं वृणे।। १०।।
शान्तः सङ्कल्पः यस्य सः। विगतः मन्युः यस्मात् सः।

यदि दित्सुः वरान् भगवन् शान्तसङ्कल्पः उपशान्तः सङ्कल्पः यस्य मां प्रति यमं प्राप्य किं नु करिष्यति मम पुत्रः इति सः शान्त-सङ्कल्पः।

सुमनाः प्रसन्न-मनाश्च यथा स्याद् वीतमन्युः विगत-रोषश्च गौतमः मम पिता मा अभि मां प्रति हे मृत्यो।

किञ्च त्वत्प्रसृष्टं त्वया विनिर्मुक्तं प्रेषितं गृहं प्रति मा माम् अभिवदेत् प्रतीतः लब्ध-स्मृतिः स एवायं पुत्रो ममागतः इत्येवं प्रत्यभिजानन् इत्यर्थः।

एतत् प्रयोजनं त्रयाणां वराणां प्रथमम् आद्यं वरं वृणे प्रार्थये यत्पितुः परितोषणम्।। १० ।।

**आनन्दगिरिटीका**

प्रेतीभूतोयमागतो नावलोकनीय इति मत्वा उपेक्षां यथा न करोति तथा प्रसादं कुरु इत्याह - किंच त्वत्प्रसृष्टम् इति। (१०)

ततो मृत्युः उवाच -

**यथा पुरस्ताद् भविता प्रतीतः औद्दालकिरारुणिर्मत्प्रसृष्टः।**

**सुखँ रात्रीः शयिता वीतमन्युः त्वां ददृशिवान् मृत्युमुखात्प्रमुक्तम्।। १.१.११।।**

औद्दालकिरारुणिः सुखं रात्रीः शयिता वीतमन्युः (च भविष्यति)। त्वां मृत्युमुखात् प्रमुक्तम् ददृशिवान् मत्प्रसृष्टः प्रतीतः (भवति)। यथा पुरस्ताद् भविता (यथा स्नेहः युक्तः आसीत्तथा भविता।) ।। ११।।

उद्दालकः एव औद्दालकिः। स्वार्थे इञ्। अरुणस्यापत्यम्। ददृशिवान् दृष्टवान्।

यथा बुद्धिः त्वयि पुरस्तात् पूर्वमासीत् स्नेह-समन्विता पितुस्तव भविता प्रीति-समन्वितस्तव पिता तथैव

प्रतीतः प्रतीतवान् सन् औद्दालकिः उद्दालकः एव औद्दालकिः।

अरुणस्यापत्यम् आरुणिः द्व्यामुष्यायणो वा।

मत्प्रसृष्टः मयानुज्ञातः सन् इतरा अपि रात्रीः सुखं प्रसन्न-मनाः शयिता स्वप्ता।

वीतमन्युः विगत-मन्युश्च भविता स्यात्।

त्वां पुत्रं ददृशिवान् दृष्टवान् सन् मृत्युमुखात् मृत्यु-गोचरात् प्रमुक्तं सन्तम्।। ११ ।।

**आनन्दगिरिटीका**

औद्दालकिरिति तद्धितः स्वार्थे व्याख्यातः अपत्यार्थे व्याख्येय इत्याह - **द्व्यामुष्यायणः वा** इति। अमुष्य प्रख्यातस्य (उद्दालकस्य) अपत्यम् आमुष्यायणः। द्वयोः पित्रोः पूर्वभाषादिना सम्बन्धी च असौ आमुष्यायणश्च। न जारजः इत्यर्थः। (११)

नचिकेता उवाच -

**स्वर्गे लोके न भयं किञ्चनास्ति। न तत्र त्वं न जरया बिभेति।**

**उभे तीर्त्वाऽशनायापिपासे शोकातिगो मोदते स्वर्गलोके।। १.१.१२ ।।**

स्वर्गे लोके किंचन भयं न अस्ति। तत्र त्वं न (सहसा प्रभवसि इति शेषः) । (पुरुषः) जरया (युक्तः) (त्वत्तः) न बिभेति। अशनायापिपासे उभे तीर्त्वा शोकातिगः (सन्) स्वर्गलोके मोदते ।। १२

स्वर्गे लोके रोगादि-निमित्तं भयं किञ्चन किञ्चिदपि न अस्ति।

न च तत्र त्वं मृत्यो सहसा प्रभवसि।

अतो जरया युक्तः इह लोकवत् त्वत्तः न बिभेति कुतश्चित् तत्र।

किञ्च उभे अशनाया-पिपासे तीर्त्वा अतिक्रम्य शोकमतीत्य गच्छति इति

शोकातिगः सन् मानसेन दुःखेन च वर्जितः मोदते हृष्यति स्वर्गलोके दिव्ये।। १२ ।।

**आनन्दगिरिटीका**
स्वर्गसाधनमग्निविज्ञानं प्रष्टुं स्वर्गस्वरूपं तावदाह - **स्वर्गे लोके** इति। (१२)

**स त्वमग्निँ स्वर्ग्यमध्येषि मृत्यो। प्रब्रूहि त्वँ श्रद्दधानाय मह्यम्।**

**स्वर्गलोका अमृतत्वं भजन्ते। एतद् द्वितीयेन वृणे वरेण।। १.१.१३ ।।**

मृत्यो सः त्वम् (सर्वलोकप्रसिद्धः) स्वर्ग्यम् अग्निं अध्येषि । (तम्) त्वं श्रद्दधानाय मह्यम् प्रब्रूहि। (येन चितेन अग्निना) स्वर्गलोकाः अमृतत्वं भजन्ते। एतद्द्वितीयेन वरेण वृणे।। १३।।

एवं-गुण-विशिष्टस्य स्वर्ग-लोकस्य प्राप्ति-साधन-भूतम् अग्निं स्वर्ग्यं स त्वं मृत्युः अध्येषि स्मरसि जानासि इत्यर्थः।

हे मृत्यो ततः त्वं प्रब्रूहि कथय श्रद्दधानाय श्रद्धावते मह्यम् स्वर्गार्थिने।

येनाग्निना चितेन स्वर्गलोकाः स्वर्गः लोकः येषां ते स्वर्ग-लोकाः यजमानाः अमृतत्वम् अमरणतां देवत्वं भजन्ते प्राप्नुवन्ति।

तद् एतद् अग्नि-विज्ञानं द्वितीयेन वरेण वृणे ।। १३ ।।

मृत्योः प्रतिज्ञेयम् -

**प्र ते ब्रवीमि तदु मे निबोध स्वर्ग्यमग्निं नचिकेतः प्रजानन्।**

**अनन्तलोकाप्तिमथो प्रतिष्ठां विद्धि त्वमेतं निहितं गुहायाम्।। १.१.१४ ।।**

नचिकेतः प्रजानन् तदु स्वर्ग्यमग्निं ते प्रब्रवीमि मे निबोध। अनन्तलोकाप्तिमथो गुहायाम् निहितं प्रतिष्ठाम् एतं त्वम् विद्धि ।। १४

ते तुभ्यं प्रब्रवीमि यत्त्वया प्रार्थितं तद् उ मे मम वचसः निबोध बुध्यस्व एकाग्रमनाः सन्।

स्वर्ग्यं स्वर्गाय हितं स्वर्ग-साधनमग्निं हे नचिकेतः प्रजानन् विज्ञातवान् सन्नहमित्यर्थः।

प्रब्रवीमि, तन्निबोध, इति च शिष्य-बुद्धि-समाधानार्थं वचनम्।

अधुनाग्निं स्तौति -अनन्त-लोकाप्तिं स्वर्ग-लोक-फल-प्राप्ति-साधनमित्येतत्।

अथो अपि प्रतिष्ठाम् आश्रयं जगतो विराड्-रूपेण, तम् एतम् अग्निं मयोच्यमानं विद्धि विजानीहि त्वं

निहितं स्थितं गुहायां विदुषां बुद्धौ निविष्टमित्यर्थः।। १४ ।।

**आनन्दगिरिटीका**

इयं च वक्ष्यमाणा मृत्योः प्रतिज्ञा अवगन्तव्या। स त्रेधा आत्मानं व्यकुरुत (आदित्यं तृतीयं वायुं तृतीयम्) (बृ १.२.३) इति श्रुतेः अग्निवाय्वादित्यरूपेण समष्टिरूपो विराडेव व्यवस्थित इति तेन विराड्रूपेण अग्निः जगतः प्रतिष्ठा इत्युच्यते। (१४)

इदं श्रुतेर्वचनम् -

**लोकादिमग्निं तमुवाच तस्मै या इष्टका यावतीर्वा यथा वा।**

**स चापि तत्प्रत्यवदद्यथोक्तम् अथास्य मृत्युः पुनरेवाऽऽह तुष्टः।। १.१.१५ ।।**

(यमः) तं लोकादिमग्निं तस्मै याः इष्टकाः यावतीः वा यथा वा (इति तत्सर्वम्) उवाच। सः च अपि तद् यथोक्तं प्रत्यवदत्। अथ मृत्युः तुष्टः पुनरेव अस्य (अस्मै) आह।

लोकादिं लोकानामादिं प्रथम-शरीरित्वात् अग्निं तं प्रकृतं नचिकेतसा प्रार्थितम् उवाच उक्तवान्मृत्युः तस्मै नचिकेतसे।

किञ्च, याः इष्टकाः चेतव्याः स्वरूपेण, यावतीर्वा सङ्ख्यया, यथा वा चीयते अग्निः येन प्रकारेण, सर्वमेतदुक्तवानित्यर्थः।

स चापि नचिकेताः तत् मृत्युना उक्तं यथावत् प्रत्ययेनावदत् प्रत्युच्चारितवान्।

अथ तस्य प्रत्युच्चारणेन तुष्टः सन् मृत्युः पुनरेवाह वर-त्रय-व्यतिरेकेणान्यं वरं दित्सुः।। १५ ।।

**आनन्दगिरिटीका**

सप्रपञ्चमग्निविज्ञानं चयनप्रकरणाद् (शतपथादिब्राह्मणग्रन्थस्थात् कात्यायनादिमहर्षिप्रोक्तश्रौतसूत्रादिगताच्च) द्रष्टव्यम् इति श्रुतिः अस्मान् बोधयति इत्याह - इदं श्रुतेः वचनमिति। (१५)

कथम् -

**तमब्रवीत् प्रीयमाणो महात्मा वरं तवेहाद्य ददामि भूयः।**

**तवैव नाम्ना भविताऽयमग्निः सृङ्कां चेमामनेकरूपां गृहाण।। १.१.१६ ।।**

प्रीयमाणः महात्मा तम् अब्रवीत् - इह अद्य तव भूयः वरं ददामि। अयमग्निः तव एव नाम्ना भविता। इमाम् अनेकरूपां सृङ्कां च गृहाण।।

तं नचिकेतसम् अब्रवीत् प्रीयमाणः शिष्य-योग्यतां पश्यन्प्रीयमाणः प्रीतिमनुभवन् महात्मा अक्षुद्र-बुद्धिः वरं

तव चतुर्थम् इह प्रीति-निमित्तम् अद्य इदानीं ददामि भूयः पुनः प्रयच्छामि।

तवैव नचिकेतसः नाम्ना अभिधानेन प्रसिद्धः भविता मयोच्यमानः अयम् अग्निः।

किञ्च, सृङ्कां शब्दवतीं रत्नमयीं मालाम् इमाम् अनेकरूपां विचित्रां गृहाण स्वीकुरु।

यद्वा, सृङ्काम् अकुत्सितां गतिं कर्ममयीं गृहाण।

अन्यदपि कर्म-विज्ञानमनेक-फल-हेतुत्वात् स्वीकुर्वित्यर्थः।। १६ ।।

पुनरपि कर्म-स्तुतिमेवाह -

**त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं त्रिकर्मकृत्तरति जन्ममृत्यू।**

**ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमाँ शान्तिमत्यन्तमेति।। १.१.१७ ।।**

त्रिभिः (सह) सन्धिं (शिष्यशिक्षकभावसंबन्धम्) एत्य त्रिकर्मकृत् (सन्) त्रिणाचिकेतः जन्ममृत्यू तरति। (किंच) ईड्यं ब्रह्मजज्ञं देवम् विदित्वा निचाय्य (आत्मभावेन ज्ञात्वा) इमां अत्यन्तम् शान्तिम् एति।।

त्रिः कृत्वः नाचिकेतः अग्निः चितः येन सः। इमां यमबुद्धिप्रत्यक्षाम्। ब्रह्मणः जातः अथवा जायते इति ब्रह्मजः। सर्वं जनाति इति ज्ञः। ब्रह्मजः च असौ ज्ञः च इति ब्रह्मजज्ञः। तं विराडात्मकं अग्निम्।

त्रिणाचिकेतः त्रिः कृत्वः नाचिकेतोऽग्निश्चितो येन सः त्रिणाचिकेतः, तद्विज्ञानः तदध्ययनः तदनुष्ठानवान्वा।

त्रिभिः मातृ-पित्राचार्यैः एत्य प्राप्य सन्धिं सन्धानं सम्बन्धम्।

मात्राद्यनुशासनं यथावत् प्राप्येत्येतत्।

तद्धि प्रामाण्य-कारणं श्रुत्यन्तराद् अवगम्यते यथा मातृमान्पितृमान् (बृ. ४.१.२) इत्यादेः।

वेद-स्मृति-शिष्टैर्वा, प्रत्यक्षानुमानागमैर्वा।

तेभ्यो हि विशुद्धिः प्रत्यक्षा।

त्रिकर्मकृत् इज्याध्ययन-दानानां कर्त्ता तरति अतिक्रामति जन्ममृत्यू।

किञ्च, ब्रह्मजज्ञं ब्रह्मणो हिरण्यगर्भाज्जातो ब्रह्मजः, ब्रह्मजश्चासौ ज्ञश्चेति ब्रह्मजज्ञः।

सर्वज्ञो ह्यसौ।

तं देवं द्योतनाज्ज्ञानादि-गुणवन्तम्, ईड्यं स्तुत्यं विदित्वा शास्त्रतः, निचाय्य दृष्ट्वा च आत्म-भावेन इमां

स्व-बुद्धि-प्रत्यक्षां शान्तिम् उपरतिम् अत्यन्तम् एति अतिशयेन एति।

वैराजं पदं ज्ञान-कर्म-समुच्चयानुष्ठानेन प्राप्नोतीत्यर्थः।। १७ ।।

**आनन्दगिरिटीका**

विशुद्धिरिति धर्माद्यवगतिः। **दृष्ट्वा च आत्मभावेन** इति। विंशत्यधिकानि सप्तशतानीष्टकानां संख्या संवत्सरस्याहोरात्राणि च तावत्संख्यकान्येव संख्यासामान्यात् तैः इष्टकास्थानीयैः चितोऽग्निः अहमित्यात्म-भावेन ध्यात्वा इति। (१७)

इदानीमग्नि-विज्ञान-चयन-फलमुपसंहरति, प्रकरणं च -

**त्रिणाचिकेतस्त्रयमेतद् विदित्वा य एवं विद्वाँश्चिनुते नाचिकेतम्।**

**स मृत्युपाशान् पुरतः प्रणोद्य शोकातिगो मोदते स्वर्गलोके।। १.१.१८ ।।**

यः त्रिणाचिकेतः विद्वान् (सन्) एवं एतत् त्रयम् विदित्वा नाचिकेतम् (अग्निम्) चिनुते स मृत्युपाशान् पुरतः प्रणोद्य शोकातिगः स्वर्गलोके मोदते ।।

त्रिणाचिकेतः त्रयं यथोक्तम् या इष्टकाः, यावतीर्वा, यथा वा इति एतद् विदित्वा अवगम्य यः च एवम्

आत्म-रूपेण अग्निं विद्वान् चिनुते निर्वर्त्तयति नाचिकेतम् अग्निं क्रतुम्, सः मृत्युपाशान् अधर्माज्ञान-राग-

द्वेषादि-लक्षणान् पुरतः अग्रतः, पूर्वम् एव शरीर-पातादित्यर्थः।

प्रणोद्य अपहाय, शोकातिगः मानसैर्दुःखैर्वर्जित इत्येतत्।

मोदते स्वर्गलोके वैराजे विराडात्म-स्वरूप-प्रतिपत्त्या।। १८ ।।

**एष तेऽग्निर्नचिकेतः स्वर्ग्यः यमवृणीथा द्वितीयेन वरेण।**

**एतमग्निं तवैव प्रवक्ष्यन्ति जनासः। तृतीयं वरं नचिकेतो वृणीष्व।। १.१.१९ ।।**

नचिकेतः यम् द्वितीयेन वरेण (त्वं) अवृणीथाः (सः) एष अग्निः स्वर्ग्यः। ते (मया दत्तः इति शेषः) एतमग्निं जनासः तवैव (नाम्ना) प्रवक्ष्यन्ति (इति वरः अपि तुष्टेन मया दत्तः इति शेषः)। नचिकेतः तृतीयं वरं वृणीष्व।।

एषः ते तुभ्यम् अग्निः वरः हे नचिकेतः स्वर्ग्यः स्वर्ग-साधनः।

यम् अग्निं वरम् अवृणीथाः वृतवान् प्रार्थितवानसि द्वितीयेन वरेण, सोऽग्निर्वरो दत्त इत्युक्तोपसंहारः।

किञ्च, एतम् अग्निं तवैव नाम्ना प्रवक्ष्यन्ति जनासः जना इत्येतत्।

एष वरो दत्तो मया चतुर्थस्तुष्टेन।

तृतीयं वरं नचिकेतः वृणीष्व।

तस्मिन्ह्यदत्ते ऋणवानहम् इत्यभिप्रायः।। १९ ।।

एतावद् हि अतिक्रान्तेन विधि-प्रतिषेधार्थेन मन्त्र-ब्राह्मणेन अवगन्तव्यं यद्वर-द्वय-सूचितं वस्तु, नात्म-तत्त्व-विषय-याथात्म्य-विज्ञानम्।

अतो विधि-प्रतिषेधार्थ-विषयस्य आत्मनि क्रिया-कारक-फलाध्यारोपण-लक्षणस्य स्वाभाविकस्याज्ञानस्य संसार-बीजस्य निवृत्त्यर्थं तद्विपरीत-ब्रह्मात्मैकत्व-विज्ञानं क्रिया-कारक-फलाध्यारोपण-लक्षण-शून्यम् आत्यन्तिक-निःश्रेयस-प्रयोजनं वक्तव्यमित्युत्तरो ग्रन्थ आरभ्यते।

तमेतमर्थं द्वितीय-वर-प्राप्त्याप्यकृतार्थत्वं तृतीय-वर-गोचरम् आत्म-ज्ञानमन्तरेण इत्याख्यायिकया प्रपञ्चयति। यतः पूर्वस्मात्कर्म-गोचरात् साध्य-साधन-लक्षणाद् अनित्याद् विरक्तस्य आत्म-ज्ञाने अधिकार इति तन्निन्दार्थं पुत्राद्युपन्यासेन प्रलोभनं क्रियते।

नचिकेताः उवाच तृतीयं वरं नचिकेतो वृणीष्व इत्युक्तः सन् -

**येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके।**

**एतद् विद्यामनुशिष्टस्त्वयाऽहम्। वराणामेष वरस्तृतीयः।। १.१.२० ।।**

मनुष्ये प्रेते (सति) या इयं विचिकित्सा - अयम् अस्ति इति एके, न अस्ति इति च एके। अहम् त्वया अनुशिष्टः एतद् विद्याम्। वराणाम् (मध्ये) एषः तृतीयः वरः।।

येयं विचिकित्सा संशयः प्रेते मृते मनुष्ये, अस्ति इत्येके अस्ति शरीरेन्द्रिय-मनो-बुद्धि-व्यतिरिक्तो देहान्तर-सम्बन्ध्यात्मा इत्येके मन्यन्ते।

नायमस्ति इति चैके नायमेवं-विधोऽस्तीति चैके। अतः चास्माकं न प्रत्यक्षेण नापि वा अनुमानेन निर्णय-विज्ञानम्। एतद्विज्ञानाधीनो हि परः पुरुषार्थ इत्यतः एतद् विद्यां विजानीयाम् अहम् अनुशिष्टः ज्ञापितः त्वया। वराणामेषः वरः तृतीयः अवशिष्टः।। २० ।।

**आनन्दगिरिटीका**

पितापुत्रस्नेहादि-स्वर्गलोकावसानं यद्वरद्वयसूचितं संसाररूपं तदेव कर्मकाण्डप्रतिपाद्यम् आत्मन्यारोपितं तन्निवर्तकं च आत्मज्ञानम् इत्यध्यारोपापवादभावेन (भावेन - तदात्मकेन) पूर्वोत्तरग्रन्थयोः संबन्धमाह - **एतावद्धीति**। प्रथमवल्लीसमाप्तिपर्यन्ताख्यायिकायाः अवान्तरसंबन्धमाह - **तमेतमर्थम्** इति। देह-व्यतिरिक्तात्मास्तित्वे वादिविप्रतिपत्तेः संशयश्चेत् तर्हि प्रत्यक्षादिना स्वस्य एव (आचार्यापेक्षां वारयति) निर्णयज्ञानसम्भवात् तन्निर्णयस्य निष्प्रयोजनत्वात् च न तदर्थः प्रश्नः कर्तव्यः इत्याशङ्क्याह - **अतश्च अस्माकम्** इति। प्रत्यक्षेण स्थाणौ निर्णीते पुरुषो न वा इति संदेहादर्शनाद् व्यतिरिक्तात्मास्तित्वे च संदेहदर्शनाद् न प्रत्यक्षेण निर्णयः परलोकसंबन्ध्यात्मना च कस्यचिद् लिङ्गस्य अविनाभावादर्शनाद् नानुमानेनापि निर्णय इत्यर्थः। (२०)

किमयम् एकान्ततो निःश्रेयस-साधनात्मज्ञानार्हः, न वा, इत्येतत्परीक्षणार्थमाह -

**देवैरत्रापि विचिकित्सितं पुरा। न हि सुविज्ञेयमणुरेष धर्मः।**

**अन्यं वरं नचिकेतो वृणीष्व। मा मोपरोत्सीरति मा सृजैनम्।। १.१.२१ ।।**

अत्र देवैः अपि पुरा विचिकित्सितम्। एषः धर्मः न सुविज्ञेयम्। हि (एषः) अणुः। नचिकेतः अन्यं वरं वृणीष्व। मा मा उपरोत्सीः। मा (मां प्रति) एनं (वरम्) अतिसृज।।

देवैरपि अत्र एतस्मिन्वस्तुनि विचिकित्सितं संशयितं पुरा पूर्वम्।

न हि सुविज्ञेयं सुष्ठु विज्ञेयं श्रुतमपि प्राकृतैर्जनैः।

यतः अणुः सूक्ष्मः एषः आत्माख्यः धर्मः।

अतः अन्यम् असन्दिग्ध-फलं वरं नचिकेतः वृणीष्व।

मा मां मा उपरोत्सीः उपरोधं मा कार्षीः अधमर्णम् इव उत्तमर्णः।

अतिसृज विमुञ्च एनं वरं मा मां प्रति।। २१ ।।

**देवैरत्रापि विचिकित्सितं किल। त्वं च मृत्यो यन्न सुविज्ञेयमात्थ।**

**वक्ता चास्य त्वादृगन्यो न लभ्यः। नान्यो वरस्तुल्य एतस्य कश्चित्।। १.१.२२ ।।**

मृत्यो देवैः अपि अत्र विचिकित्सितं किल। यत् त्वं च न सुविज्ञेयम् आत्थ। अस्य त्वादृग् वक्ता च अन्यः न लभ्यः। एतस्य तुल्यः वरः अन्यः न कश्चित् (अस्ति)।

देवैरत्रापि एतस्मिन् वस्तुनि विचिकित्सितं किल इति भवत एव नः श्रुतम्, त्वं च मृत्यो यत् यस्मात्

न सुविज्ञेयम् आत्म-तत्त्वम् आत्थ कथयसि, अतः पण्डितैः उपदेशनीयत्वाद् वक्ता च अस्य धर्मस्य

त्वादृक् त्वत्तुल्यः अन्यः पण्डितश्च न लभ्यः अन्विष्यमाणः अपि।

अयं तु वरो निःश्रेयस-प्राप्ति-हेतुः।

अतः न अन्यः वरः तुल्यः सदृशोऽस्ति एतस्य कश्चिद् अपि।

अनित्य-फलत्वादन्यस्य सर्वस्यैव इत्यभिप्रायः।। २२ ।।

एवमुक्तोऽपि पुनः प्रलोभयन्नुवाच मृत्युः -

**शतायुषः पुत्रपौत्रान् वृणीष्व बहून् पशून् हस्तिहिरण्यमश्वान्।**

**भूमेर्महदायतनं वृणीष्व। स्वयं च जीव शरदो यावदिच्छसि।। १.१.२३ ।।**

शतायुषः पुत्रपौत्रान् वृणीष्व। बहून् पशून् हस्तिहिरण्यम् अश्वान् (वृणीष्व)। भूमेः महदायतनं वृणीष्व। स्वयं च जीव यावत् शरदः इच्छसि।

शतायुषः शतं वर्षाणि आयूंषि येषां तान् शतायुषः पुत्रपौत्रान् वृणीष्व।

किञ्च, गवादि-लक्षणान् बहून् पशून्।

हस्तिहिरण्यं हस्ती च हिरण्यं च हस्ति-हिरण्यम्।

अश्वान् च।

किञ्च, भूमेः पृथिव्याः महत् विस्तीर्णम् आयतनम् आश्रयं मण्डलं साम्राज्यं वृणीष्व।

किञ्च, सर्वमप्येतदनर्थकं स्वयं चेदल्पायुरित्यत आह -

स्वयं च त्वं जीव धारय शरीरं समग्रेन्द्रिय-कलापं

शरदः वर्षाणि यावद् इच्छसि जीवितुम्।। २३ ।।

**एतत्तुल्यं यदि मन्यसे वरं वृणीष्व वित्तं चिरजीविकां च।**

**महाभूमौ नचिकेतस्त्वमेधि। कामानां त्वा कामभाजं करोमि।। १.१.२४ ।।**

यदि एतत्तुल्यं वरं मन्यसे (तमपि) वृणीष्व, चिरजीविकां च वित्तं (वित्तेन सह) (वृणीष्व)। नचिकेतः त्वम् महाभूमौ (राजा) एधि (भव)। त्वा कामानां कामभाजं करोमि।।

एतत्तुल्यम् एतेन यथोपदिष्टेन सदृशम् अन्यमपि यदि मन्यसे वरम्, तमपि वृणीष्व।

किञ्च, वित्तं प्रभूतं हिरण्य-रत्नादि चिरजीविकां च सह वित्तेन वृणीष्वेत्येतत्।

किं बहुना महाभूमौ महत्यां भूमौ राजा नचिकेतः त्वम् एधि भव।

किञ्चान्यत्। कामानां दिव्यानां मानुषाणां च त्वा त्वां कामभाजं काम-भागिनं कामार्हं करोमि।

सत्य-सङ्कल्पो ह्यहं देवः।। २४ ।।

**आनन्दगिरिटीका**

एकैकं पुत्रधनादीनां (निर्धारणे षष्ठी) वरत्वेन उपन्यस्य समुच्चितमिदानीम् उपन्यस्यति - **किं च वित्तं प्रभूतम्** इति। असु भुवि इति धातोः लोण्मध्यमपुरुषैकवचनान्तस्य निपातः एधि इति। ततो भव इति व्याख्यातम्। (२४)

**ये ये कामा दुर्लभा मर्त्यलोके सर्वान् कामाँ्श्छन्दतः प्रार्थयस्व।**

**इमा रामाः सरथाः सतूर्याः। न हीदृशा लम्भनीया मनुष्यैः।**

**आभिर्मत्प्रत्ताभिः परिचारयस्व। नचिकेतो मरणं माऽनुप्राक्षीः।। १.१.२५ ।।**

मर्त्यलोके ये ये कामा दुर्लभाः (तान्) सर्वान् कामान् छन्दतः प्रार्थयस्व। हि इमाः रामाः सरथाः सतूर्याः ईदृशाः (वा) मनुष्यैः न लम्भनीयाः। मत्प्रत्ताभिः आभिः परिचारयस्व। नचिकेतः मरणं (मरण-विषयं प्रश्नं) मा अनुप्राक्षीः।।

ये ये कामाः प्रार्थनीयाः दुर्लभाः च मर्त्य-लोके, सर्वान् तान् कामान् छन्दतः इच्छातः प्रार्थयस्व।

किञ्च, इमाः दिव्या अप्सरसः, रमयन्ति पुरुषानिति रामाः, सह रथैर्वर्त्तन्त इति सरथाः, सतूर्याः सवादित्राः।

ताश्च न हि लम्भनीयाः प्रापणीयाः ईदृशाः एवं-विधाः मनुष्यैः मर्त्यैः अस्मदादि-प्रसादमन्तरेण।

आभिः मत्प्रत्ताभिः मया प्रदत्ताभिः परिचारिणीभिः परिचारयस्व आत्मानम्, पाद-प्रक्षालनादि-शुश्रूषां कारय आत्मन इत्यर्थः।

हे नचिकेतः मरणं मरण-सम्बद्धं प्रश्नं प्रेते अस्ति नास्ति इति काक-दन्त-परीक्षा-रूपं मा अनुप्राक्षीः मैवं प्रष्टुमर्हसि।। २५ ।।

मृत्युना एवं प्रलोभ्यमानोऽपि नचिकेताः महाह्रदवद् अक्षोभ्यः आह -

**श्वोभावा मर्त्यस्य यदन्तकैतत् सर्वेन्द्रियाणां जरयन्ति तेजः।**

**अपि सर्वं जीवितमल्पमेव। तवैव वाहास्तव नृत्यगीते।। १.१.२६ ।।**

मर्त्यस्य अन्तक यत् एतत् श्वोभावाः सर्वेन्द्रियाणां तेजः जरयन्ति। सर्वम् अपि जीवितम् अल्पमेव। तव वाहाः तव एव (भवन्तु) नृत्यगीते (तव एव भवताम्)।।

श्वोभावाः श्वो भविष्यन्ति न भविष्यन्ति वेति संदिह्यमान एव येषां भावो भवनं त्वयोपन्यस्तानां भोगानां ते

श्वोभावाः।

किञ्च, मर्त्यस्य मनुष्यस्य अन्तक हे मृत्यो, यदेतत् सर्वेन्द्रियाणां तेजः तद् जरयन्ति अपक्षपयन्ति।

अप्सरः-प्रभृतयो भोगा अनर्थायैवैते। धर्म-वीर्य-प्रज्ञा-तेजो-यशः-प्रभृतीनां क्षपयितृत्वात्।

यां च अपि दीर्घ-जीविकां त्वं दित्ससि तत्रापि श्रृणु।

सर्वं यद्ब्रह्मणोऽपि जीवितम् आयुः अल्पमेव, किमुत अस्मदादि-दीर्घ-जीविका।

अतः तवैव तिष्ठन्तु वाहाः रथादयः, तथा तव नृत्यगीते च।। २६ ।।

किञ्च -

**न वित्तेन तर्पणीयो मनुष्यः। लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वा।**

**जीविष्यामो यावदीशिष्यसि त्वम्। वरस्तु मे वरणीयः स एव।। १.१.२७ ।।**

मनुष्यः वित्तेन न तर्पणीयः। त्वा (त्वां) अद्राक्ष्म चेत् वित्तं लप्स्यामहे। यावत् त्वम् ईशिष्यसि (तावत्) जीविष्यामः। सः एव तु मे वरणीयः वरः।

न प्रभूतेन वित्तेन तर्पणीयो मनुष्यः।

न हि लोके वित्त-लाभः कस्यचित् तृप्ति-करो दृष्टः।

यदि नाम अस्माकं वित्त-तृष्णा स्यात्, लप्स्यामहे प्राप्स्यामहे इत्येतत् वित्तम्, अद्राक्ष्म दृष्टवन्तो वयं चेत् त्वा त्वाम्। जीवितमपि तथैव।

जीविष्यामः यावत् याम्ये पदे त्वम् ईशिष्यसि ईशिष्यसे, प्रभुः स्याः।

कथं हि मर्त्यस्त्वया समेत्य अल्प-धनायुर्भवेत् वरस्तु मे वरणीयः सः एव यदात्म-विज्ञानम्।। २७ ।।

यतश्च -

**अजीर्यताममृतानामुपेत्य जीर्यन् मर्त्यः क्वधःस्थः प्रजानन्।**

**अभिध्यायन् वर्णरतिप्रमोदान् अतिदीर्घे जीविते को रमेत।। १.१.२८ ।।**

मृत्यो क्वधःस्थः कः मर्त्यः जीर्यन् अजीर्यताम् अमृतानाम् उपेत्य (तेभ्यः उत्कृष्टफलसम्भवं) प्रजानन् वर्णरतिप्रमोदान् अभिध्यायन् अतिदीर्घे जीविते रमेत।।

अजीर्यतां वयो-हानिमप्राप्नुवताम् अमृतानां सकाशम् उपेत्य उपगम्य आत्मन उत्कृष्टं प्रयोजनान्तरं प्राप्तव्यं तेभ्यः प्रजानन् उपलभमानः, स्वयं तु जीर्यन् मर्त्यः जरा-मरणवान् क्वधःस्थः कुः पृथिवी अधश्च अन्तरिक्षादि-लोकापेक्षया तस्यां तिष्ठतीति क्वधःस्थः सन् कथमेवमविवेकिभिः प्रार्थनीयं पुत्र-वित्त-हिरण्याद्यस्थिरं वृणीते। क्व तदास्थः इति वा पाठान्तरम्।

अस्मिन्पक्षे चैवमक्षरयोजना - तेषु पुत्रादिषु आस्था आस्थितिः तात्पर्येण वर्त्तनं यस्य स तदास्थः। ततोऽधिकतरं पुरुषार्थं दुष्प्रापमपि प्रापिपयिषुः क्व तदास्थो भवेत् न कश्चित्तदसारज्ञस्तदर्थी स्यादित्यर्थः। सर्वो ह्युपर्युपर्येव बुभूषति लोकः। तस्मान्न पुत्र-वित्तादि-लोभैः प्रलोभ्योऽहम्।

किञ्च, अप्सरः-प्रमुखान् वर्णरतिप्रमोदान् अनवस्थित-रूपतया अभिध्यायन् निरूपयन् यथावद् अतिदीर्घे जीविते कः विवेकी रमेत।। २८ ।।

**आनन्दगिरिटीका**

किंच उत्कृष्टपुरुषार्थलाभे सम्भवति अधमं कामयमानः मूर्खः एवाहं स्याम्। ततोऽपि मम स एव वरः इत्याह - **यतश्च अजीर्यताम्** इत्यादिना। (२८)

अतो विहाय अनित्यैः कामैः प्रलोभनम्, यन्मया प्रार्थितम् -

**यस्मिन्निदं विचिकित्सन्ति मृत्यो यत्साम्पराये महति ब्रूहि नस्तत्।**

**योऽयं वरो गूढमनुप्रविष्टः। नान्यं तस्मान्नचिकेता वृणीते।। १.१.२९ ।।**

।। इति प्रथमेऽध्याये प्रथमा वल्ली।।

मृत्यो यस्मिन् महति साम्पराये इदं यत् विचिकित्सन्ति तत् नः ब्रूहि। यः अयं गूढमनुप्रविष्टः वरः तस्माद् (वराद्) अन्यं (वरं) नचिकेताः न वृणीते।।

यस्मिन् प्रेते इदं विचिकित्सनं विचिकित्सन्ति अस्ति नास्तीत्येवं-प्रकारं हे मृत्यो, साम्पराये पर-लोक-विषये महति महत्प्रयोजन-निमित्ते आत्मनो निर्णय-विज्ञानं यत्, तत् ब्रूहि कथय नः अस्मभ्यम्। किं बहुना, योऽयं प्रकृत आत्म-विषयः वरः गूढं गहनं दुर्विवेचनं प्राप्तः अनुप्रविष्टः, तस्माद् वराद् अन्यम् अविवेकिभिः प्रार्थनीयम् अनित्य-विषयं वरं नचिकेताः न वृणीते मनसापि इति श्रुतेर्वचनम् इति।। २९ ।।

इति प्रथमवल्लीभाष्यम्।।

परीक्ष्य शिष्यं विद्या-योग्यतां चावगम्याह -

**अन्यच्छ्रेयोऽन्यदुतैव प्रेयः। ते उभे नानार्थे पुरुषँ्सिनीतः।**

**तयोः श्रेय आददानस्य साधु भवति। हीयतेऽर्थाद्य उ प्रेयो वृणीते।। १.२.१।।**

श्रेयः अन्यत्। प्रेयः उत अन्यत् एव। ते उभे पुरुषं नानार्थे सिनीतः। तयोः श्रेयः आददानस्य साधु भवति। यः उ प्रेयः वृणीते (सः) अर्थाद् हीयते।। १.२.१।।

अन्यत् पृथगेव श्रेयः निःश्रेयसम्।

तथा अन्यद् उत अपि एव प्रेयः प्रियतरमपि।

ते श्रेयः-प्रेयसी उभे नानार्थे भिन्न-प्रयोजने सती पुरुषम् अधिकृतं वर्णाश्रमादि-विशिष्टं सिनीतः बध्नीतः।

ताभ्यां विद्याविद्याभ्याम् आत्म-कर्त्तव्यतया प्रयुज्यते सर्वः पुरुषः।

श्रेयः-प्रेयसोर्हि अभ्युदयामृतत्वार्थी पुरुषः प्रवर्तते।

अतः श्रेयः-प्रेयः-प्रयोजन-कर्त्तव्यतया ताभ्यां बद्ध इत्युच्यते सर्वः पुरुषः।

ते यद्यप्येकैक-पुरुषार्थ-सम्बन्धिनी विद्याविद्या-रूपत्वाद्विरुद्धे इति अन्यतरापरित्यागेनैकेन पुरुषेण

सहानुष्ठातुमशक्यत्वात् तयोः हित्वाऽविद्या-रूपं प्रेयः, श्रेयः एव केवलम् आददानस्य उपादानं कुर्वतः

साधु शोभनं शिवं भवति।

यस्त्वदूर-दर्शी विमूढो हीयते वियुज्यते।

कस्मात् अर्थात् पुरुषार्थात् पारमार्थिकात् प्रयोजनान्नित्यात् प्रच्यवत इत्यर्थः।

कोऽसौ य उ प्रेयः वृणीते उपादत्ते इत्येतत्।। १ ।।

**आनन्दगिरिटीका**

अभ्युदय-निःश्रेयस-विभागप्रदर्शनेन विद्याऽविद्याप्रदर्शनेन च केवलविद्यार्थितया शिष्यं प्रथमं स्तौति इत्याह - **परीक्ष्य** इति। श्रेयःप्रेयसोः अन्यतर-परित्यागेन एव अन्यतरोपादाने हेतुमाह - **ते यद्यपि** इति। ते यद्यपि एकैक-पुरुष-सम्बन्धिनी तथापि विरुद्धे। (१)

यद्युभे अपि कर्तुं स्वायत्ते पुरुषेण, किमर्थं प्रेय एवादत्ते बाहुल्येन लोकः इत्युच्यते -

**श्रेयश्च प्रेयश्च मनुष्यमेतः। तौ सम्परीत्य विविनक्ति धीरः।**

**श्रेयो हि धीरोऽभि प्रेयसो वृणीते। प्रेयो मन्दो योगक्षेमाद् वृणीते।। १.२.२ ।।**

श्रेयश्च प्रेयश्च मनुष्यमेतः। धीरः तौ सम्परीत्य विविनक्ति। धीरः प्रेयसः श्रेयो हि अभिवृणीते। मन्दः योगक्षेमात् प्रेयः वृणीते।। १.२.२ ।।

**आ इतः एतः इण् गतौ एति इतः यन्ति। इ आभाष्यम्**

सत्यं स्वायत्ते। तथापि साधनतः फलतश्च मन्द-बुद्धीनां दुर्विवेक-रूपे सती व्यामिश्री-भूते इव मनुष्यं पुरुषम् आ इतः प्राप्नुतः श्रेयश्च प्रेयश्च।

अतो हंस इव अम्भसः पयः, तौ श्रेयः-प्रेयः-पदार्थौ सम्परीत्य सम्यक्परिगम्य मनसा आलोच्य गुरु-लाघवं विविनक्ति पृथक् करोति धीरः धीमान्।

विविच्य च श्रेयो हि श्रेय एव अभिवृणीते प्रेयसः अभ्यर्हितत्वाच्छ्रेयसः।

कोऽसौ धीरः। यस्तु मन्दः अल्प-बुद्धिः सः विवेकासामर्थ्याद् योगक्षेमात् योग-क्षेम-निमित्तं शरीराद्युपचय-रक्षण-निमित्तम् इत्येतत्। प्रेयः पशु-पुत्रादि-लक्षणं वृणीते।। २ ।।

**स त्वं प्रियान् प्रियरूपाँश्च कामान् अभिध्यायन् नचिकेतोऽत्यस्राक्षीः।**

**नैताँसृङ्कां वित्तमयीमवाप्तः यस्यां मज्जन्ति बहवो मनुष्याः।। १.२.३ ।।**

स त्वं नचिकेतः प्रियान् प्रियरूपाँश्च कामान् अभिध्यायन् अत्यस्राक्षीः। यस्यां बहवो मनुष्याः मज्जन्ति एतां वित्तमयीं सृङ्कां न अवाप्तः।। १.२.३ ।।

स त्वं पुनः पुनः मया प्रलोभ्यमानोऽपि प्रियान् पुत्रादीन् प्रियरूपांश्च अप्सरः-प्रभृति-लक्षणान् कामान् अभिध्यायन् चिन्तयन् तेषामनित्यत्वासारत्वादि-दोषान् हे नचिकेतः अत्यस्राक्षीः अतिसृष्टवान् परित्यक्तवानसि।

अहो बुद्धिमत्ता तव।

न एताम् अवाप्तवानसि सृङ्कां सृतिं कुत्सितां मूढ-जन-प्रवृत्तां वित्तमयीं धन-प्रायाम्।

यस्यां सृतौ मज्जन्ति सीदन्ति बहवः अनेके मूढाः मनुष्याः।। ३ ।।

तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते इति ह्युक्तम्। तत्कस्मात् यतः -

**दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता।**

**विद्याभीप्सिनं नचिकेतसं मन्ये। न त्वा कामा बहवोऽलोलुपन्त।। १.२.४ ।।**

या अविद्या विद्येति च ज्ञाता एते दूरं विपरीते विषूची। नचिकेतसं विद्याभीप्सिनं मन्ये। त्वा बहवः कामाः न अलोलुपन्त।। १.२.४ ।।

दूरं दूरेण महतान्तरेण एते विपरीते अन्योन्य-व्यावृत्त-रूपे विवेकाविवेकात्मकत्वात् तमः-प्रकाशौ इव।

विषूची विषूच्यौ नाना-गती, भिन्न-फले संसार-मोक्ष-हेतुत्वेन इत्येतत्।

के ते इत्युच्यते - या च अविद्या प्रेयो-विषया विद्येति च श्रेयो-विषया ज्ञाता निर्ज्ञाताऽवगता पण्डितैः।

तत्र विद्याभीप्सिनं विद्यार्थिनं नचिकेतसं त्वामहं मन्ये।

कस्मात् यस्मादविद्वद्-बुद्धि-प्रलोभिनः कामाः अप्सरः-प्रभृतयः बहवः अपि त्वा त्वां न अलोलुपन्त न

विच्छेदं कृतवन्तः श्रेयो-मार्गाद् आत्मोपभोगाभिवाञ्छा-सम्पादनेन।

अतो विद्यार्थिनं श्रेयो-भाजनं मन्ये इत्यभिप्रायः।। ४ ।।

ये तु संसार-भाजो जनाः -

**अविद्यायामन्तरे वर्त्तमानाः स्वयं धीराः पण्डितंमन्यमानाः।**

**दन्द्रम्यमाणाः परियन्ति मूढाः अन्धेनैव नीयमाना यथाऽन्धाः।। १.२.५ ।।**

अविद्यायामन्तरे वर्त्तमानाः स्वयं धीराः पण्डितंमन्यमानाः दन्द्रम्यमाणाः मूढाः परियन्ति यथा अन्धेनैव नीयमाना अन्धाः।। १.२.५ ।।

अविद्यायाम् अन्तरे मध्ये घनीभूते इव तमसि वर्त्तमानाः वेष्ट्यमानाः पुत्र-पश्वादि-तृष्णा-पाश-शतैः,

स्वयं वयं धीराः प्रज्ञावन्तः पण्डिताः शास्त्र-कुशलाश्चेति मन्यमानाः।

ते दन्द्रम्यमाणाः अत्यर्थं कुटिलामनेक-रूपां गतिं गच्छन्तः जरा-मरण-रोगादि-दुःखैः परियन्ति परिगच्छन्ति

मूढाः अविवेकिनः अन्धेनैव दृष्टि-विहीनेनैव नीयमानाः विषमे पथि यथा बहवः अन्धाः

महान्तमनर्थमृच्छन्ति, तद्वत्।। ५ ।।

अत एव मूढत्वात् -

**न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम्।**

**अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे।। १.२.६ ।।**

साम्परायः बालं वित्तमोहेन मूढम् (अत एव) प्रमाद्यन्तं प्रति न भाति (अथवा न प्रतिभाति)। अयं लोको नास्ति परः इति मानी (सः) पुनः पुनः मे वशमापद्यते।

न साम्परायः प्रतिभाति। सम्परेयते इति सम्परायः पर-लोकः, तत्प्राप्ति-प्रयोजनः साधन-विशेषः शास्त्रीयः साम्परायः। स च बालम् अविवेकिनं प्रति न प्रतिभाति न प्रकाशते नोपतिष्ठते इत्येतत्।

प्रमाद्यन्तं प्रमादं कुर्वन्तं पुत्र-पश्वादि-प्रयोजनेष्वासक्त-मनसम्।

तथा वित्तमोहेन वित्त-निमित्तेनाविवेकेन मूढं तमसाच्छन्नं सन्तं अयम् एव लोकः योऽयं दृश्यमानः स्त्र्यन्न-पानादि-विशिष्टः, नास्ति परः अदृष्टो लोकः, इत्येवं मनन-शीलः मानी।

पुनः पुनः जनित्वा वशं मदधीनताम् आपद्यते मे मृत्योर्मम।

जनन-मरणादि-लक्षण-दुःख-प्रबन्धारूढ एव भवतीत्यर्थः।

प्रायेण ह्येवं-विध एव लोकः।। ६ ।।

**आनन्दगिरिटीका**

सम्यक्पराक् काले देहपातादूर्ध्वमेव ईयते गम्यते इति अर्थः। (६)

यस्तु श्रेयोर्थी स सहस्रेषु कश्चिदेवात्म-विद्भवति त्वद्विधः यस्मात् -

**श्रवणायापि बहुभिर्यो न लभ्यः श्रृण्वन्तोऽपि बहवो यं न विद्युः।**

**आश्चर्यो वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्टः।। १.२.७ ।।**

यः (आत्मा) बहुभिः श्रवणायापि न लभ्यः। यम् (आत्मानं) श्रृण्वन्तोऽपि बहवो न विद्युः। अस्य (आत्मन्ः) वक्ता आश्चर्यः। अस्य (आत्मन्ः) लब्धा कुशलः। (अस्य) कुशलानुशिष्टः ज्ञाता आश्चर्यः (अस्ति)।

श्रवणायापि श्रवणार्थं श्रोतुमपि यः न लभ्यः आत्मा बहुभिः अनेकैः।

श्रृण्वन्तोऽपि बहवः अनेकेऽन्ये यम् आत्मानं न विद्युः न विदन्ति अभागिनोऽसंस्कृतात्मानो न विजानीयुः।

किञ्च, अस्य वक्ता अपि आश्चर्यः अद्भुतवद् एव, अनेकेषु कश्चिदेव भवति।

तथा श्रुत्वापि अस्य आत्मनः कुशलः निपुण एवानेकेषु लब्धा कश्चिदेव भवति।

यस्मात् आश्चर्यः ज्ञाता कश्चिदेव कुशलानुशिष्टः कुशलेन निपुणेनाचार्येण अनुशिष्टः सन्।। ७ ।।

कस्मात् -

**न नरेणावरेण प्रोक्त एषः सुविज्ञेयो बहुधा चिन्त्यमानः।**

**अनन्यप्रोक्तेऽगतिरत्र नास्ति अणीयान् ह्यतर्क्यमणुप्रमाणात्।। १.२.८ ।।**

हि (एषः आत्मा) अणुप्रमाणात् अणीयान् अतर्क्यम् (अतर्क्यः) (अतः) बहुधा चिन्त्यमानः (भवति)। (तस्मात्) एषः (आत्मा) अवरेण नरेण प्रोक्तः सुविज्ञेयः न (भवति)। अनन्यप्रोक्ते अगतिः अत्र नास्ति।

न हि नरेण मनुष्येण अवरेण प्रोक्तः - अवरेण हीनेन प्राकृत-बुद्धिनेत्येतत् - उक्तः एषः आत्मा यं त्वं मां पृच्छसि, न हि सुष्ठु सम्यक् विज्ञेयः विज्ञातुं शक्यः।

यस्माद् बहुधा अस्ति, नास्ति कर्ताकर्ता शुद्धोऽशुद्धः इत्याद्यनेकधा चिन्त्यमानः वादिभिः।

कथं पुनः सुविज्ञेयः इत्युच्यते - १) अनन्यप्रोक्ते अनन्येन अपृथग्दर्शिना आचार्येण प्रतिपाद्य-ब्रह्मात्म-भूतेन प्रोक्ते उक्ते, आत्मनि गतिः अनेकधा अस्ति-नास्तीत्यादि-लक्षणा चिन्ता गतिः, अत्र अस्मिन्नात्मनि नास्ति न विद्यते। सर्व-विकल्प-गति-प्रत्यस्तमितत्वादात्मनः।

२) अथवा स्वात्म-भूते अनन्यस्मिन् आत्मनि प्रोक्ते अनन्य-प्रोक्ते गतिः अत्र अन्यावगतिर्नास्ति ज्ञेयस्यान्यस्याभावात्। ज्ञानस्य ह्येषा परा काष्ठा यदात्मैकत्व-विज्ञानम्।

अतः अवगन्तव्याभावान्न गतिरत्रावशिष्यते।

३) संसार-गतिर्वा अत्र नास्ति, अनन्ये आत्मनि प्रोक्ते नान्तरीयकत्वात् तद्विज्ञान-फलस्य मोक्षस्य।

४) अथवा प्रोच्यमान-ब्रह्मात्म-भूतेन आचार्येण अनन्यतया प्रोक्ते आत्मनि अगतिः अनवबोधः अपरिज्ञानमत्र नास्ति। भवत्येवावगतिस्तद्विषया श्रोतुः तदस्म्यहम् इत्याचार्यस्य इव इत्यर्थः।

एवं सुविज्ञेयः आत्मा आगमवताचार्येण अनन्यतया प्रोक्तः।

इतरथा हि अणीयान् अणुतरः अणुप्रमाणाद् अपि सम्पद्यते आत्मा।

अतर्क्यम् अतर्क्यः स्व-बुद्ध्या अभ्यूहेन केवलेन तर्केण।

तर्क्यमाणेऽणुपरिमाणे केनचित्स्थापिते आत्मनि, ततो ह्यणुतरमन्योऽभ्यूहति, ततोऽप्यन्योऽणुतममिति। न हि कुतर्कस्य निष्ठा क्वचिद्विद्यते।। ८ ।।

**आनन्दगिरिटीका**
अणुत्वं परोक्षत्वम्। (८)

**नैषा तर्केण मतिरापनेया। प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ।**

**यां त्वमापः सत्यधृतिर्बतासि। त्वादृङ्नो भूयान्नचिकेतः प्रष्टा।। १.२.९ ।।**

प्रेष्ठ त्वम् यां (मतिम्) आपः एषा मतिः तर्केण न आपनेया। अन्येन एव प्रोक्ता सुज्ञानाय (भवति)। हे नचिकेतः सत्यधृतिः बत असि। त्वादृक् प्रष्टा नः भूयात् ।

अतोऽनन्यप्रोक्ते आत्मन्युत्पन्ना येयमागम-प्रतिपाद्या आत्म-मतिः नैषा तर्केण स्व-बुद्ध्यभ्यूह-मात्रेण आपनेया न प्रापणीयेत्यर्थः।

न अपनेतव्या वा, न हातव्या। तार्किको हि अनागमज्ञः स्व-बुद्धि-परिकल्पितं यत्किञ्चिदेव कथयति। अत एव च येयमागम-प्रभूता मतिः अन्येनैव आगमाभिज्ञेनाचार्येण एव तार्किकात् प्रोक्ता सती सुज्ञानाय भवति हे प्रेष्ठ प्रियतम।

का पुनः सा तर्कागम्या मतिः इत्युच्यते - यां त्वं मतिं मद्वर-प्रदानेन आपः प्राप्तवानसि।

सत्या अवितथ-विषया धृतिर्यस्य तव स त्वं सत्य-धृतिः बतासि इत्यनुकम्पयन्नाह मृत्युर्नचिकेतसं वक्ष्यमाण-विज्ञान-स्तुतये। त्वादृक् त्वत्तुल्यः नः अस्मभ्यं भूयात् भवतात्। भवत्वन्यः पुत्रः शिष्यो वा प्रष्टा। कीदृक् यादृक्त्वं हे नचिकेतः प्रष्टा।। ९ ।।

पुनरपि तुष्टः आह -

**जानाम्यहँ शेवधिरित्यनित्यम्। न ह्यध्रुवैः प्राप्यते हि ध्रुवं तत्।**

**ततो मया नाचिकेतश्चितोऽग्निः। अनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम्।।१.२.१०।।**

शेवधिः अनित्यम् इति अहम् जानामि। तत् ध्रुवं अध्रुवैः न हि प्राप्यते हि। ततो मया अनित्यैः द्रव्यैः हे नचिकेतः अग्निः चितः। (तेन) नित्यम् प्राप्तवान् अस्मि।

जानाम्यहं शेवधिः निधिः कर्म-फल-लक्षणः, निधिः इव प्रार्थ्यत इति।

असौ अनित्यम् अनित्य इति जानामि। न हि यस्माद् अनित्यैः अध्रुवैः नित्यं ध्रुवम्, तत् प्राप्यते परमात्माख्यः शेवधिः।

यस्त्वनित्य-सुखात्मकः शेवधिः स एवानित्यैर्द्रव्यैः प्राप्यते हि यतः, ततः तस्माद् मया जानतापि नित्यमनित्य-साधनैः न प्राप्यते इति नाचिकेतः चितः अग्निः अनित्यैः द्रव्यैः पश्वादिभिः स्वर्ग-सुख-साधन-भूतोऽग्निः निर्वर्त्तित इत्यर्थः।

तेनाहमधिकारापन्नो नित्यं याम्यं स्थानं स्वर्गाख्यं नित्यमापेक्षिकं प्राप्तवानस्मि।। १०।।

**आनन्दगिरिटीका**

मया जानता अपि बह्वायासं कर्म कृतं त्वं दीयमानमपि तत्फलं न गृह्णासि मत्तोऽधिकप्रज्ञोऽसि इति सन्तोषात् स्तौति इत्याह - **पुनरपि तुष्ट आह** इति। (१०)

**कामस्याप्तिं जगतः प्रतिष्ठां क्रतोरनन्त्यमभयस्य पारम्।**

**स्तोमं महदुरुगायं प्रतिष्ठां दृष्ट्वा धृत्या धीरो नचिकेतोऽत्यस्त्राक्षीः।। १.२.११।।**

कामस्य आप्तिं जगतः प्रतिष्ठां क्रतोः अनन्त्यम् अभयस्य पारम्। स्तोमं महत् उरुगायं प्रतिष्ठां दृष्ट्वा हे नचिकेतः (नचिकेताः) (त्वं) धृत्या धीरः (सन्) अत्यस्राक्षीः।

त्वं तु कामस्य आप्तिं समाप्तिम्। अत्रैव इहैव सर्वे कामाः परिसमाप्ताः।

जगतः साध्यात्माधिभूताधिदैवादेः प्रतिष्ठाम् आश्रयं सर्वात्मकत्वात्।

क्रतोः उपासनायाः फलं हैरण्यगर्भं पदम्, अनन्त्यम् आनन्त्यम्।

अभयस्य च पारं परां निष्ठाम्।

स्तोमं स्तुत्यम्, महद् अणिमाद्यैश्वर्याद्यनेक-गुण-संहतम्, स्तोमं च तन्महच्च निरतिशयत्वात् स्तोममहत्।

उरुगायं विस्तीर्णां गतिम्।

प्रतिष्ठां स्थितिमात्मनोऽनुत्तमामपि दृष्ट्वा धृत्या धैर्येण धीरः धीमान्सन् नचिकेतः अत्यस्राक्षीः

परमेवाकाङ्क्षन् अतिसृष्टवानसि सर्वमेतत्संसार-भोग-जातम्।

अहो बतानुत्तम-गुणोऽसि।। ११ ।।

**तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।**

**अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति।। १.२.१२ ।।**

तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् देवं अध्यात्मयोगाधिगमेन मत्वा धीरो हर्षशोकौ जहाति।। १.२.१२ ।।
यं त्वं ज्ञातुमिच्छस्यात्मानं तं दुर्दर्शं दुःखेन दर्शनमस्येति दुर्दर्शः, अतिसूक्ष्मत्वात्, तम्।

गूढं गहनम् अनुप्रविष्टं प्राकृत-विषय-विकार-विज्ञानैः प्रच्छन्नमित्येतत्।

गुहाहितं गुहायां बुद्धौ (निहितं) स्थितं तत्रोपलभ्यमानत्वात्।

गह्वरेष्ठं गह्वरे विषमे अनेकानर्थ-सङ्कटे तिष्ठतीति गह्वरेष्ठम्।

यत एवं गूढमनुप्रविष्टो गुहाहितश्च, अतोऽसौ गह्वरेष्ठः। अतो दुर्दर्शः।

तं पुराणं पुरातनम् अध्यात्मयोगाधिगमेन विषयेभ्यः प्रतिसंहृत्य चेतस आत्मनि समाधानम् अध्यात्म-योगः,

तस्याधिगमः तेन, मत्वा देवम् आत्मानं धीरः (धीमान्) हर्षशोकौ आत्मनः उत्कर्षापकर्षयोरभावाद्

जहाति।। १२ ।।

**आनन्दगिरिटीका**
यश्च त्वया देहव्यतिरिक्त आत्मा पृष्टः तस्यैव परमार्थत्वरूपज्ञानं संसारनिवर्तकं परमानन्दप्राप्तिसाधनं धर्म्यं च नातः परं श्रेयःसाधनमस्तीति पृष्टस्य वस्तुनः प्रशंसया च प्रष्टारं प्रशंसति - यं त्वं ज्ञातुमिच्छसि इत्यादिना। (१२)

किञ्च -

**एतच्छ्रुत्वा सम्परिगृह्य मर्त्यः प्रवृह्य धर्म्यमणुमेतमाप्य।**

**स मोदते मोदनीयँ्हि लब्ध्वा। विवृतँ्सद्म नचिकेतसं मन्ये।। १.२.१३ ।।**

सः मर्त्यः एतत् श्रुत्वा सम्परिगृह्य धर्म्यम् प्रवृह्य एतम् अणुम् आप्य मोदनीयँ्हि लब्ध्वा मोदते। नचिकेतसं (प्रति) सद्म (ब्रह्मात्मकं) विवृतम् (इति) मन्ये।। १.२.१३ ।।

एतद् आत्म-तत्त्वं यदहं वक्ष्यामि, तत् श्रुत्वा आचार्य-सकाशात् सम्यग् आत्म-भावेन परिगृह्य उपादाय मर्त्यः मरण-धर्मा, धर्मादनपेतं धर्म्यं प्रवृह्य उद्यम्य पृथक्कृत्य शरीरादेः (अणुं) सूक्ष्मम् एतम् आत्मानम् आप्य प्राप्य सः मर्त्यः विद्वान् मोदते मोदनीयं हर्षणीयम् आत्मानं लब्ध्वा।

तदेतद् एवं-विधं ब्रह्म सद्म भवनं नचिकेतसं त्वां प्रति अपावृत-द्वारं विवृतम् अभिमुखी-भूतं मन्ये। मोक्षार्हं त्वां मन्ये इत्यभिप्रायः।। १३।।

एतच्छ्रुत्वा नचिकेताः पुनराह -

**अन्यत्र धर्मादन्यत्राधर्मात्। अन्यत्रास्मात् कृताकृतात्।**

**अन्यत्र भूताच्च भव्याच्च। यत्तत्पश्यसि तद् वद।। १.२.१४ ।।**

अन्यत्र धर्मादन्यत्राधर्मात्। अन्यत्रास्मात् कृताकृतात् अन्यत्र भूताच्च भव्याच्च यत् (वस्तु त्वम्) पश्यसि तद् वद।। १.२.१४ ।।

यद्यहं योग्यः, प्रसन्नश्चासि, भगवन् मां प्रति, अन्यत्र धर्मात् शास्त्रीयाद्धर्मानुष्ठानात् तत्फलात्तत्कारकेभ्यश्च पृथग्भूतमित्यर्थः।

तथा अन्यत्र अधर्मात्।

तथा अन्यत्रास्मात् कृताकृतात् कृतं कार्यम् अकृतं कारणम् अस्मादन्यत्र।

किञ्च, अन्यत्र भूताच्च अतिक्रान्तात्कालात् भव्याच्च भविष्यतश्च, तथा वर्त्तमानात्। काल-त्रयेण यन्न परिच्छिद्यते इत्यर्थः। यद् ईदृशं वस्तु सर्व-व्यवहार-गोचरातीतं पश्यसि जानासि तद्वद मह्यम्।। १४ ।।

**आनन्दगिरिटीका**

यदि देहव्यतिरिक्तस्य आत्मनः प्रथमं पृष्टस्य परमार्थस्वरूपज्ञानमेव श्रेयःसाधनं तर्हि तदेव ब्रूहि इत्याह - **यद्यहं योग्य** इत्यादिना। अत एव वरदानव्यतिरेकेण अपूर्वोऽयं प्रश्नः इति नाऽऽशङ्कनीयं, पूर्वपृष्टस्य एव याथातथ्यप्रश्नः पृष्टस्य वस्तुनो विशेषणान्तरं ज्ञानसाधनं वक्तुमित्यर्थः। (१४)

इत्येवं पृष्टवते मृत्युरुवाच, पृष्टं वस्तु विशेषणान्तरं च विवक्षन् -

**सर्वे वेदा यत्पदमामनन्ति। तपाँसि सर्वाणि च यद् वदन्ति।**

**यदिच्छन्तो ब्रह्मचर्यं चरन्ति। तत्ते पदँसङ्ग्रहेण ब्रवीमि।। ओमित्येतत्।। १.२.१५।।**

सर्वे वेदाः यत् पदम् आमनन्ति, सर्वाणि तपांसि च यद् वदन्ति (यत्प्राप्तये विहितानि), यत् इच्छन्तो ब्रह्मचर्यं चरन्ति। तत् पदं ते सङ्ग्रहेण ब्रवीमि। ओम् इत्येतत्।

सर्वे वेदाः यत्पदं पदनीयं गमनीयम् अविभागेनाविरोधेन आमनन्ति प्रतिपादयन्ति।

तपांसि सर्वाणि च यद्वदन्ति यत्प्राप्त्यर्थानीत्यर्थः।

यदिच्छन्तो ब्रह्मचर्यं गुरु-कुल-वास-लक्षणम् अन्यद्वा ब्रह्म-प्राप्त्यर्थं चरन्ति।

तत् ते तुभ्यं पदं यज्ज्ञातुमिच्छसि सङ्ग्रहेण संक्षेपतः ब्रवीमि ॐ इत्येतत्।

तदेतत्पदं यद्बुभुत्सितं त्वया तदेतदोमिति, ओंशब्द-वाच्यम्, ओंशब्द-प्रतीकं च।। १५ ।।

**आनन्दगिरिटीका**

**सर्वे वेदा** इति। वेदैकदेशा उपनिषदः। अनेन (सर्वे वेदाः...इत्यनेन वाक्येन) उपनिषदः ज्ञानसाधनत्वेन साक्षाद्विनियुक्ताः तपांसि तेषां (कर्मकाण्डात्मकानां वेदानां) कर्माणि शुद्धिद्वारेण अवगतिसाधनानि। मन्दाधिकारिणो विचारासमर्थस्य क्रमेण अवगतिसाधनं संक्षिप्याह - **संग्रहेण** इति। यस्य शब्दस्य उच्चारणे यत्स्फुरति तत् तस्य वाच्यं प्रसिद्धम्। समाहितचित्तस्य ओंकारोच्चारणे यद्विषयानुपरक्तं संवेदनं स्फुरति तद् ओंकारमवलम्ब्य तद्वाच्यं (ओंकारवाच्यं) ब्रह्म अस्मीति ध्यायेत्। तत्राप्यसमर्थं ओंशब्दे एव ब्रह्मदृष्टिं कुर्यात् इत्यर्थः। (ओंकारशब्दं प्रतीकत्वेन गृहीत्वा प्रतिमायामिव विष्णुबुद्धिवत्)। (१५)

अतः -

**एतद्ध्येवाक्षरं ब्रह्म। एतद्ध्येवाक्षरं परम्।**

**एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्।। १.२.१६ ।।**

एतत् हि एव अक्षरं ब्रह्म। एतत् हि एव अक्षरं परम्। एतत् एव हि अक्षरं ज्ञात्वा (ध्यात्वा) यो यत् इच्छति तस्य तत् (भवति)।

एतद्ध्येवाक्षरं ब्रह्म अपरम्।

एतद्ध्येवाक्षरं परं च।

तयोर्हि प्रतीकमेतदक्षरम्।

एतद्ध्येवाक्षरं ज्ञात्वा उपास्य ब्रह्मेति यः यदिच्छति परमपरं वा तस्य तत् भवति।

परं चेत् ज्ञातव्यम्।

अपरं चेत् प्राप्तव्यम्।। १६ ।।

यत एवम् अतः -

**एतदालम्बनँ श्रेष्ठम्। एतदालम्बनं परम्।**

**एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते।। १.२.१७ ।।**

एतत् आलम्बनं श्रेष्ठम्। एतत् आलम्बनं परम्। एतत् आलम्बनं ज्ञात्वा ब्रह्मलोके महीयते।

एतत् ब्रह्मप्राप्त्यालम्बनानां श्रेष्ठं प्रशस्यतमम्।

एतदालम्बनं परम् अपरं च, परापर-ब्रह्म-विषयत्वात्।

एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते।

परस्मिन् ब्रह्मण्यपरस्मिंश्च ब्रह्म-भूतो ब्रह्मवद् उपास्यो भवतीत्यर्थः।। १७ ।।

अन्यत्र धर्मात् इत्यादिना पृष्टस्यात्मनः अशेष-विशेष-रहितस्य आलम्बनत्वेन प्रतीकत्वेन च ओङ्कारो निर्दिष्टः, अपरस्य च ब्रह्मणः, मन्द-मध्यम-प्रतिपत्तॄन्प्रति।

अथेदानीं तस्य ओङ्कारालम्बनस्यात्मनः साक्षात्स्वरूप-निर्दिधारयिषया इदमुच्यते -

**न जायते म्रियते वा विपश्चित्। नायं कुतश्चिन्न बभूव कश्चित्।**

**अजो नित्यः शाश्वतोऽयं पुराणः। न हन्यते हन्यमाने शरीरे।। १.२.१८ ।।**

(अयम्) विपश्चित् न जायते म्रियते वा। अयं कुतश्चित् न बभूव। कश्चित् (अस्मात्) न (बभूव)। अयं अजो नित्यः शाश्वतः पुराणः। शरीरे हन्यमाने (अयं) न हन्यते।

न जायते नोत्पद्यते म्रियते वा न म्रियते च। उत्पत्तिमतो वस्तुनोऽनित्यस्यानेका विक्रियाः।

तासामाद्यन्ते जन्म-विनाश-लक्षणे विक्रिये इहात्मनि प्रतिषिध्येते प्रथमं, सर्व-विक्रिया-प्रतिषेधार्थं न जायते म्रियते वा इति।

विपश्चिद् मेधावी, अविपरिलुप्त-चैतन्य-स्वभावत्वात्।

किञ्च, न अयम् आत्मा कुतश्चित् कारणान्तरा□भूव न प्रभूतः।

स्वस्माच्चात्मनो न बभूव कश्चिद् अर्थान्तर-भूतः।

अतोऽयमात्मा अजः नित्यः शाश्वतः अपक्षय-विवर्जितः।

यो हि अशाश्वतः सोऽपक्षीयते। अयं तु शाश्वतः।

अत एव पुराणः पुरापि नव एवेति।

यो हि अवयवोपचय-द्वारेणाभिनिर्वर्त्यते, स इदानीं नवः, यथा कुम्भादिः।

तद्विपरीतस्त्वात्मा पुराणो वृद्धि-विवर्जित इत्यर्थः।

यत एवम्, अतः न हन्यते न हिंस्यते हन्यमाने शस्त्रादिभिः शरीरे, तत्स्थोऽपि आकाशवद् एव।। १८ ।।

**आनन्दगिरिटीका**

साधनहीनाय उपदेशोऽनर्थकः इति मत्वा उच्चावचम् अवगतिसाधनमुक्त्वा वक्तव्यस्वरूपं यत्पृष्टं तदभिधानाय उपक्रमते इत्याह - **अन्यत्र धर्माद्** इत्यादिना। यदि आत्मनः अन्यद् ब्रह्म स्यात् तत्र जन्मादिप्राप्त्यभावाद् अप्राप्तनिषेधः स्यादतो जन्मादिप्रतिषेधेन ब्रह्म उपदिशन् आत्मस्वरूपमेव उपदिशति इति गम्यते। मरणनिमित्ता च नास्तित्वाशङ्का आत्मनः, मरणाभावे अस्तित्व-विषयप्रश्नस्य अपि एतदेव वचनं भवति इति द्रष्टव्यम्। (१८)

**हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्।**

**उभौ तौ न विजानीतः। नायं हन्ति न हन्यते।। १.२.१९ ।।**

हन्ता चेद् (यदि) हन्तुं मन्यते, हतः चेत् (यदि) हतम् मन्यते तौ उभौ न विजानीतः। अयं (आत्मा) न हन्ति, न हन्यते।

एवं-भूतमप्यात्मानं शरीर-मात्रात्म-दृष्टिः हन्ता चेद् यदि मन्यते चिन्तयति हन्तुं हनिष्याम्येनम् इति।

योऽप्यन्यो हतः सोऽपि चेद् मन्यते हतम् आत्मानं हतोऽहम् इति।

उभौ अपि तौ न विजानीतः स्वमात्मानम्।

यतः नायं हन्ति अविक्रियत्वाद् आत्मनः। तथा न हन्यते आकाशवद् अविक्रियत्वादेव।

अतः अनात्मज्ञ-विषय एव धर्माधर्मादि-लक्षणः संसारः नात्मज्ञस्य। श्रुति-प्रामाण्यात्, न्यायाच्च

धर्माधर्माद्यनुपपत्तेः।। १९ ।।

**आनन्दगिरिटीका**

यदि अविक्रिय एव आत्मा तर्हि धर्माद्यधिकार्यभावात् तदसिद्धौ संसारोपलम्भ एव न स्याद् इत्याशङ्क्याह - **अनात्मज्ञविषय एव** इति। यदज्ञानात् प्रवृत्तिः स्यात् तज्ज्ञानात् सा कुतो भवेदिति न्यायाच्च आत्मज्ञस्य धर्मादि नोपपद्यते। अतः आत्मज्ञः सदा मुक्तः एव इत्याह - **न्यायाच्च** इति। तदुक्तम् - विवेकी सर्वदा मुक्तः कुर्वतो नास्ति कर्तृता। अलेपवादमाश्रित्य (अलेपवादम् - नैव किंचित् करोमीति, यथा सर्वगतं सौक्ष्म्यादित्यादिप्रमाणोत्थं दृढं प्रत्ययमिति यावत्।) श्रीकृष्णजनकौ यथा। इति।। (आ.गि)।

कथं पुनरात्मानं जानाति इत्युच्यते -

**अणोरणीयान् महतो महीयान् आत्माऽस्य जन्तोर्निहितो गुहायाम्।**

**तमक्रतुः पश्यति वीतशोकः धातुप्रसादान्महिमानमात्मनः।। १.२.२० ।।**

आत्मा अणोः अणीयान्। महतो महीयान्। (सः आत्मा) अस्य जन्तोः गुहायाम् निहितः। अक्रतुः धातुप्रसादात् आत्मनः तम् महिमानम् पश्यति। (ततः) वीतशोकः (भवति)।

अणोः सूक्ष्माद् अणीयान् श्यामाकादेरणुतरः।

महतः महत्परिमाणाद् महीयान् महत्तरः पृथिव्यादेः।

अणु महद्वा यदस्ति लोके वस्तु, तत्तेनैवात्मना नित्येनात्मवत् सम्भवति।

तदात्मना विनिर्मुक्तमसत् सम्पद्यते।

तस्मादसावेवात्मा अणोरणीयान्महतो महीयान्, सर्व-नाम-रूप-वस्तूपाधिकत्वात्।

स च आत्मा अस्य जन्तोः ब्रह्मादि-स्तम्ब-पर्यन्तस्य प्राणि-जातस्य गुहायां हृदये निहितः आत्म-भूतः स्थित

इत्यर्थः।

तम् आत्मानं दर्शन-श्रवण-मनन-विज्ञान-लिङ्गम् अक्रतुः अकामः, दृष्टादृष्ट-बाह्य-विषयेभ्यः उपरत-बुद्धिरित्यर्थः।

यदा चैवं तदा मन-आदीनि करणानि धातवः शरीरस्य धारणात् प्रसीदन्तीत्येषां धातूनां प्रसादाद् आत्मनः महिमानं कर्म-निमित्त-वृद्धि-क्षय-रहितं पश्यति अयमहमस्मि इति साक्षाद्विजानाति।

ततो विगत-शोको भवति।। २० ।।

**आनन्दगिरिटीका**

अकामत्वादि-साधनान्तर-विधानार्थमुत्तरवाक्यमवतारयति - **कथं पुनः** इति। एकस्याणुत्वं महत्वं च विरुद्धं कथमनूद्यते इत्याशङ्क्य अणुत्वाद्यध्यासाधिष्ठानत्वाद् अणुत्वादिव्यवहारो न तत्त्वतः इत्यविरोधमाह - **अणु महद्वा** इति। (२०)

अन्यथा दुर्विज्ञेयोऽयमात्मा कामिभिः प्राकृत-पुरुषैर्यस्मात् -

**आसीनो दूरं व्रजति। शयानो याति सर्वतः।**

**कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति।। १.२.२१ ।।**

आसीनः दूरं व्रजति। शयानः सर्वतः याति। तं मदामदं देवं मदन्यः कः ज्ञातुम् अर्हति।

आसीनः अवस्थितोऽचल एव सन् दूरं व्रजति। शयानः याति सर्वतः।

एवमसावात्मा देवो मदामदः समदोऽमदश्च, सहर्षोऽहर्षश्च, विरुद्ध-धर्मवान्।

अतोऽशक्यत्वाज्ज्ञातुं कः तं मदामदं देवं मदन्यो ज्ञातुमर्हति।

अस्मदादेरेव सूक्ष्म-बुद्धेः पण्डितस्य कस्यचित्सुविज्ञेयोऽयमात्मा स्थिति-गति-नित्यानित्यादि-विरुद्धानेक-धर्मोपाधित्वाद् विरुद्ध-धर्मवत्वाद् विश्वरूपः इव चिन्तामणिवद् अवभासते।

अतो दुर्विज्ञेयत्वं दर्शयति - कस्तं मदन्यो ज्ञातुमर्हतीति।

**आत्मनि विरुद्धधर्मवत्त्वस्य परिहारः**

करणानामुपशमः शयनम्।

करण-जनितस्यैकदेश-विज्ञानस्य उपशमः शयानस्य भवति।

यदा चैवं केवल-सामान्य-विज्ञानत्वात् सर्वतो याति इव।

यदा विशेष-विज्ञानस्थः स्वेन रूपेण स्थित एव सन् मन-आदि-गतिषु तदुपाधिकत्वाद्दूरं व्रजति इव।

स च इहैव वर्त्तते।। २१ ।।

**आनन्दगिरिटीका**

विरुद्धानेकधर्मवत्त्वाद् दुर्विज्ञेयश्चेद् आत्मा कथं तर्हि पण्डितस्यापि सुज्ञेयः स्यादित्याशङ्क्याह - **स्थितिगति** इति। विश्वरूपो मणिः यथा नानारूपो अवभासते परं नानाविधोपाधिसन्निधानाद् न स्वतो नानारूपः, चिन्तामणौ वा यद्यच्चिन्त्यते तत्तच्चिन्तोपाधिकमेव अवभासते, न तत्त्वतः। तथा स्थितिगति-नित्यानित्यादयो विरुद्धानेकधर्माः येषां तदुपाधिवशाद् आत्मापि विरुद्धधर्मवानिव अवभासते इति योजना। इति तस्य सुविज्ञेयो भवति। उपाध्यविविक्तदर्शिनस्तु दुर्विज्ञेय एव इत्यर्थः। स्वतो विरुद्धधर्मवत्त्वं नास्तीत्येतदेव श्रुतियोजनया दर्शयति - **करणानाम्** इत्यादिना।

तद्विज्ञानाच्च शोकात्यय इत्यपि दर्शयति -

**अशरीरँ शरीरेषु अनवस्थेष्ववस्थितम्।**

**महान्तं विभुमात्मानं मत्वा धीरो न शोचति।। १.२.२२ ।।**

धीरः अनवस्थेषु शरीरेषु अवस्थितम् अशरीरं महान्तं विभुम् आत्मानं मत्वा न शोचति।

अशरीरः स्वेन रूपेणाकाश-कल्प आत्मा।

तम् अशरीरं शरीरेषु देव-पितृ-मनुष्यादि-शरीरेषु।

अनवस्थेषु अवस्थिति-रहितेष्वनित्येषु अवस्थितं नित्यम्।

अविकृतम् इत्येतत्। महान्तम्। महत्त्वस्यापेक्षिकत्व-शङ्कायामाह विभुं व्यापिनम्।

आत्मानम् आत्म-ग्रहणं स्वतोऽनन्यत्व-प्रदर्शनार्थम्।

आत्म-शब्दः प्रत्यगात्म-विषये एव मुख्यः।

तम् ईदृशमात्मानं मत्वा अयमहम् इति, धीरः धीमान् न शोचति।

न हि एवं-विधस्यात्म-विदः शोकोपपत्तिः।। २२ ।।

यद्यपि दुर्विज्ञेयोऽयमात्मा तथाप्युपायेन सुविज्ञेय एवेत्याह -

**नायमात्मा प्रवचनेन लभ्यः। न मेधया न बहुना श्रुतेन।**

**यमेवैष वृणुते तेन लभ्यः। तस्यैष आत्मा विवृणुते तनूँ्स्वाम्।। १.२.२३।।**

अयम् आत्मा प्रवचनेन न लभ्यः। मेधया न (लभ्यः)। बहुना श्रुतेन न (लभ्यः)। यम् (आत्मानम्) एव एषः (साधकः) वृणुते तेन (साधकेन) लभ्यः। तस्य एषः आत्मा स्वाम् तनूं विवृणुते ।।

नायमात्मा प्रवचनेन अनेक-वेद-स्वीकरणेन लभ्यः ज्ञेयः।

न अपि मेधया ग्रन्थार्थ-धारण-शक्त्या।

न बहुना श्रुतेन न बाहु-श्रुत्येन केवलेन। केन तर्हि लभ्यः इत्युच्यते छ

यमेव स्वमात्मानम् एषः साधकः वृणुते प्रार्थयते,

तेन एवात्मना वरित्रा स्वयमात्मा लभ्यः ज्ञायते इत्येतत्।

निष्कामश्चात्मानमेव प्रार्थयतः आत्मनैवात्मा लभ्यते इत्यर्थः।

कथं लभ्यते इत्युच्यते - तस्य आत्म-कामस्य एषः आत्मा विवृणुते प्रकाशयति पारमार्थिकीं तनूं स्वां

स्वकीयां स्व-याथात्म्यमित्यर्थः।। २३ ।।

**आनन्दगिरिटीका**

**न बहुना श्रुतेन** इति। आत्मप्रतिपादकोपनिषद्विचारातिरिक्त-शास्त्र-श्रवणेन न लभ्यः। उपनिषद्विचारेणापि केवलेन सिद्धोपदेश-रहितेन न लभ्यते इत्यर्थः। परमेश्वराचार्यानुग्रहेण तु लभ्यते इत्याह - **यमेव** इति। स्वात्मानमेव साधकः श्रवणमननादिभिः वृणुते सम्भजते श्रवणादिकालेऽपि सोऽहमित्यभेदेन एव अनुसंधत्ते इत्यर्थः। **तेनैव** इति। लक्षणया परमात्मानुग्रहेण एव वरित्रा अभेदानुसंधानवता यथानुसन्धानम् आत्मतया एव परमात्मा लभ्यो भवति इत्यर्थः। वैपरीत्येन वा योजना। आत्मा त्वेष प्रकरणी परमात्मा अन्तर्यामिरूपेण आचार्यरूपेण वा व्यवस्थितो यमेव मुमुक्षुं वृणुते भजते अनुगृह्णाति। तेनैव परमेश्वरानुगृहीतेन अभेदानुसन्धानवता लभ्यते इत्यर्थः। (२३)

किञ्चान्यत् -

**नाविरतो दुश्चरिताद् नाशान्तो नासमाहितः।**

**नाशान्तमानसो वाऽपि। प्रज्ञानेनैनमाप्नुयात्।। १.२.२४ ।।**

दुश्चरिताद् अविरतः एनम् प्रज्ञानेन न आप्नुयात्। अशान्तः न (आप्नुयात्)। असमाहितः न (आप्नुयात्)। अशान्तमानसः वा अपि न (आप्नुयात्)।

न दुश्चरितात् प्रतिषिद्धाच्छ्रुति-स्मृत्यविहितात् पाप-कर्मणः अविरतः अनुपरतः।

न अपि इन्द्रिय-लौल्यात् अशान्तः अनुपरतः।

न अपि असमाहितः अनेकाग्र-मनाः विक्षिप्त-चित्तः।

समाहित-चित्तोऽपि सन्समाधान-फलार्थित्वात् न अपि अशान्त-मानसः व्यापृत-चित्तो वा।

प्रज्ञानेन ब्रह्म-विज्ञानेन एनं प्रकृतमात्मानम् आप्नुयात्।

यस्तु दुश्चरिताद्विरतः, इन्द्रिय-लौल्याच्च, समाहित-चित्तः,

समाधान-फलादप्युपशान्त-मानसश्च, आचार्यवान् प्रज्ञानेन यथोक्तमात्मानं प्राप्नोतीत्यर्थः।। २४ ।।

**आनन्दगिरिटीका**

दुश्चरितं कायिकं पापम्। (२४)

यस्त्वनेवं-भूतः -

**यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः।**

**मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः।। १.२.२५ ।।**

यस्य ब्रह्म च क्षत्रं च उभे ओदनः भवतः, यस्य मृत्युः उपसेचनं (भवति), सः यत्र (अस्ति) इत्था कः वेद।

।। इति प्रथमेऽध्याये द्वितीया वल्ली ।।

यस्य आत्मनः ब्रह्म च क्षत्रं च ब्रह्म-क्षत्रे सर्व-धर्म-विधारकेऽपि सर्व-त्राण-भूते उभे ओदनः अशनं भवतः स्याताम्।

सर्व-हरोऽपि मृत्युः यस्य उपसेचनम् एव ओदनस्य, अशनत्वेऽप्यपर्याप्तः।

तं प्राकृत-बुद्धिर्यथोक्त-साधनरहितः सन् कः इत्था इत्थमेवं यथोक्त-साधनवान् इव इत्यर्थः।

वेद विजानाति यत्र सः आत्मेति।। २५ ।।

**आनन्दगिरिटीका**

यस्त्वनेवंभूतः उक्तसाधनसम्पन्नो न भवति स कथं वेद इति सम्बन्धः। **अशनत्वेऽपि अपर्याप्त** इति। अन्नत्वेऽपि असमर्थः शाकस्थानीयः इत्यर्थः। यत्र स्वे महिम्नि स विश्वोपसंहर्ता वर्त्तते तथाभूतं तं को वेद इति संबन्धः। (२५)

।। इति द्वितीयवल्लीभाष्यम्।।

## अध्याय १ वल्ली ३

ऋतं पिबन्तौ इत्यस्या वल्ल्याः सम्बन्धः - विद्याविद्ये नाना-विरुद्ध-फले इत्युपन्यस्ते।

न तु सफले ते यथावन्निर्णीते। तन्निर्णयार्था रथ-रूपक-कल्पना।

तथा च प्रतिपत्ति-सौकर्यम्। एवं च प्राप्तृ-प्राप्य-गन्तृ-गन्तव्य-विवेकार्थं द्वौ आत्मानौ उपन्यस्येते -

**ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे।**

**छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः।। १.३.१।।**

लोके सुकृतस्य ऋतं पिबन्तौ (जीवपरमात्मानौ) परमे परार्धे गुहां (गुहायां) प्रविष्टौ। छायातपौ (इव विलक्षणो) (इति) ब्रह्मविदो वदन्ति। ये पञ्चाग्नयः त्रिणाचिकेताःस च (तेऽपि वदन्ति)।। १.३.१।।

ऋतं सत्यम् अवश्यं-भावित्वात् कर्म-फलं पिबन्तौ।

एकस्तत्र कर्म-फलं पिबति भुङ्क्ते नेतरः।

तथापि पातृ-सम्बन्धात् पिबन्तावित्युच्यते च्छत्रि-न्यायेन।

सुकृतस्य स्वयं-कृतस्य कर्मणः ऋतम् इति पूर्वेण सम्बन्धः।

लोके अस्मिन् शरीरे, गुहां गुहायां बुद्धौ प्रविष्टौ।

परमे बाह्य-पुरुषाकाश-संस्थानापेक्षया परमम्।

परार्धे परस्य ब्रह्मणोऽर्धं स्थानं परार्धं हार्दाकाशम्।

तस्मिन् हि परं ब्रह्मोपलभ्यते।

अतः तस्मिन्परमे परार्धे हार्दाकाशे प्रविष्टावित्यर्थः।

तौ च च्छायातपौ इव विलक्षणौ संसारित्वासंसारित्वेन ब्रह्मविदः वदन्ति कथयन्ति। न केवलमकर्मिण एव वदन्ति। पञ्चाग्नयः गृहस्थाः।

ये च त्रिणाचिकेताः त्रिः-कृत्वो नाचिकेतोऽग्निश्चितो यैस्ते त्रिणाचिकेताः।। १ ।।

**आनन्दगिरिटीका**

**रथरूपकल्पनेति**। प्रसिद्धरथसादृश्यकल्पना इत्यर्थः। ऋतपानकर्ता जीवः तावदेकः चेतनः सिद्धः। द्वितीयान्वेषणायां लोके संख्याश्रवणे समान-स्वभावे प्रथमप्रतीतिदर्शनाच्च चेतनतया समानस्वभावः परमात्मैव द्वितीयः प्रतीयते। तस्य च उपचाराद् ऋतपातृत्वमित्यर्थः। बाह्यपुरुषाकारसंस्थानं देहाश्रयः आकाशप्रदेशः। **पञ्चाग्नयः** इति। गार्हपत्यो दक्षिणाग्निराहवनीयः सभ्य आवसथ्यश्च इत्येते पञ्चाग्नयः येषां ते। तथोक्ताः। द्युपर्जन्यपृथिवीपुरुषयोषित्सु अग्निदृष्टिं ये कुर्वते अग्निहोत्रादिकारिणः ते वा (बृ. ६.२.९) पञ्चाग्नयः इत्यर्थः। (१)

**यः सेतुरीजानानामक्षरं ब्रह्म यत्परम्।**

**अभयं तितीर्षतां पारं नाचिकेत ँशकेमहि।। १.३.२ ।।**

यः ईजानानां (यजनशीलानां कर्मिणाम्) सेतुः (तं) नाचिकेत ँशकेमहि। पारं तितीर्षताम् (मुमुक्षूणाम्) अभयम् (आश्रयभूतम्) यत् अक्षरं परं ब्रह्म (तदपि ज्ञातुं शकेमहि)।। १.३.२ ।।
यजन्ते इति ईजानः। तर्त्तुमिच्छताम् - तितीर्षताम्।

यः सेतुः सेतुः इव सेतुः ईजानानां यजमानानां कर्मिणां, दुःख-सन्तरणार्थत्वात्।

नाचिकेतं नाचिकेतोऽग्निः तम्, वयं ज्ञातुं चेतुं च शकेमहि शक्नुवन्तः।

किञ्च, यच्च अभयं भय-शून्यं, संसारस्य पारं तितीर्षतां तर्त्तुमिच्छतां ब्रह्म-विदां यत्परम् आश्रयम् अक्षरम्

आत्माख्यं ब्रह्म, तच्च ज्ञातुं शकेमहि।

परापरे ब्रह्मणी कर्म-ब्रह्म-विदाश्रये वेदितव्ये इति वाक्यार्थः।

तयोरेव ह्युपन्यासः कृतः ऋतं पिबन्तौ इति।। २ ।।

**आनन्दगिरिटीका**

ननु न सन्ति ब्रह्मविदः पञ्चाग्निविदश्च साम्प्रतम् अनुपलम्भाद् इत्याशङ्क्य पूर्व-विद्वदनुभव-विरोधमाह - **यः सेतुरिव** इत्यादिना। पूर्वेषां यद्यपि ब्रह्मवित्त्वादि सम्भवति प्रभावातिशयत्वात् तथापि नाधुनिकानामल्प-प्रज्ञानां सम्भवति इत्याशङ्क्य चेतनत्वात् स्वाभाविकी ज्ञातृत्वयोग्यता अस्ति इत्यभिप्रेत्य तात्पर्यमाह - **परापरे** इति।

तत्र यः उपाधिकृतः संसारी विद्याविद्ययोरधिकृतः मोक्ष-गमनाय संसार-गमनाय च, तस्य तदुभय-गमने

साधनो रथः कल्प्यते -

**आत्मान्ँ रथिनं विद्धि। शरीर्ँ रथमेव तु।**

**बुद्धिं तु सारथिं विद्धि। मनः प्रग्रहमेव च।। १.३.३ ।।**

आत्मानं रथिनं विद्धि शरीरं तु रथमेव (विद्धि)। बुद्धिं तु सारथिं विद्धि। मनः च प्रग्रहमेव (विद्धि) ।। १.३.३ ।।

तत्र तम् आत्मानम् ऋतपं संसारिणं रथिनं रथ-स्वामिनं विद्धि जानीहि।

शरीरं रथम् एव तु रथ-बद्ध-हय-स्थानीयैरिन्द्रियैराकृष्यमाणत्वात् शरीरस्य।

बुद्धिं तु अध्यवसाय-लक्षणां सारथिं विद्धि। बुद्धि-नेतृ-प्रधानत्वात् शरीरस्य, सारथि-नेतृ-प्रधान इव रथः।

सर्वं हि देह-गतं कार्यं बुद्धि-कर्त्तव्यमेव प्रायेण।

मनः सङ्कल्प-विकल्पादि-लक्षणं प्रग्रहम् रशनां विद्धि।

मनसा हि प्रगृहीतानि श्रोत्रादीनि करणानि प्रवर्त्तन्ते रशनया इव अश्वाः।। ३ ।।

**आनन्दगिरिटीका**

**तत्रेति**। तयोः प्रथमग्रन्थोक्तयोः आत्मनोः मध्ये। (३)

**इन्द्रियाणि हयानाहुः। विषयाँ्स्तेषु गोचरान्।**

**आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः।। १.३.४ ।।**

मनीषिणः इन्द्रियाणि हयानाहुः। तेषु (तेषामिन्द्रियाणां हयस्थानीयानाम्) विषयान् गोचरान् (आहुः)। आत्मेन्द्रियमनोयुक्तं (आत्मानम्) भोक्ता इति (आहुः)।

गौः। गावः चरन्ति येषु इति गोचरान्। मार्गः। आत्मा च इन्द्रियाणि च मनः च आत्मेन्द्रियमनांसि। तैः आत्मेन्द्रियमनोभिः युक्तम्।

इन्द्रियाणि चक्षुरादीनि हयानाहुः रथ-कल्पना-कुशलाः, शरीर-रथाकर्षण-सामान्यात्।

तेषु एव इन्द्रियेषु हयत्वेन परिकल्पितेषु गोचरान् मार्गान् रूपादीन् विषयान् विद्धि।

आत्मेन्द्रियमनोयुक्तं शरीरेन्द्रिय-मनोभिः सहितं संयुक्तमात्मानं भोक्तेति संसारीति आहुः मनीषिणः विवेकिनः।

न हि केवलस्यात्मनो भोक्तृत्वमस्ति। बुद्ध्याद्युपाधि-कृतमेव तस्य भोक्तृत्वम्।

तथा च श्रुत्यन्तरं केवलस्याभोक्तृत्वमेव दर्शयति - ध्यायति इव लेलायति इव (बृ. ४.३.७) इत्यादि।

एवं च सति वक्ष्यमाण-रथ-कल्पनया वैष्णवस्य पदस्यात्मतया प्रतिपत्तिरुपपद्यते, नान्यथा, स्वभावानतिक्रमात्।। ४ ।।

**आनन्दगिरिटीका**

आत्मा रथस्वामी यः कल्पितः तस्य भोक्तृत्वं च न स्वाभाविकमित्याह - **आत्मेन्द्रियमनोयुक्तमिति**। औपाधिके भोक्तृत्वे अन्वय-व्यतिरेकौ, शास्त्रं च, प्रमाणमित्याह - **न हि केवलस्य** इति। वैष्णवपदप्राप्ति-श्रुत्यनुपपत्त्या न स्वाभाविकं भोक्तृत्वं वाच्यमित्याह - **एवं च सति** इति।(भोक्तृत्वस्य औपाधिकत्वे सति।)। (४)

तत्रैवं सति -

**यस्त्वविज्ञानवान् भवति अयुक्तेन मनसा सदा।**

**तस्येन्द्रियाण्यवश्यानि। दुष्टाश्वा इव सारथेः।। १.३.५ ।।**

यस्तु सदा अयुक्तेन मनसा अविज्ञानवान् भवति तस्य इन्द्रियाणि सारथेः दुष्टाश्वाः इव अवश्यानि (भवन्ति)।
अविज्ञानवान् - प्रवृत्तिनिवृत्तिविषये विवेकहीनः। अवश्यानि - उन्मार्गगामिनि।

यस्तु बुद्ध्याख्यः सारथिः अविज्ञानवान् अनिपुणोऽविवेकी प्रवृत्तौ च निवृत्तौ च भवति यथा इतरो रथ-

चर्यायाम् अयुक्तेन अप्रगृहीतेन,

असमाहितेन मनसा प्रग्रह-स्थानीयेन सदा युक्तो भवति,

तस्य अकुशलस्य बुद्धि-सारथेः इन्द्रियाणि अश्व-स्थानीयानि अवश्यानि अशक्य-निवारणानि दुष्टाश्वाः

अदान्ताश्वाः इव इतर-सारथेः भवन्ति।। ५ ।।

**यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा।**

**तस्येन्द्रियाणि वश्यानि। सदश्वा इव सारथेः।। १.३.६ ।।**

यस्तु सदा युक्तेन मनसा विज्ञानवान् भवति तस्य इन्द्रियाणि सारथेः सदश्वाः (शिक्षिताश्वाः) इव वश्यानि (भवन्ति)।

यस्तु पुनः पूर्वोक्त-विपरीतः सारथिः भवति विज्ञानवान् निपुणः विवेकवान् युक्तेन मनसा प्रगृहीत-मनाः समाहित-चित्तः सदा,

तस्य अश्व-स्थानीयानि इन्द्रियाणि प्रवर्त्तयितुं निवर्त्तयितुं वा शक्यानि वश्यानि दान्ताः सदश्वाः इव इतर-सारथेः।। ६।।

तत्र पूर्वोक्तस्याविज्ञानवतो बुद्धि-सारथेरिदं फलमाह -

**यस्त्वविज्ञानवान् भवति अमनस्कः सदाऽशुचिः।**

**न स तत्पदमाप्नोति। संसारं चाधिगच्छति।। १.३.७ ।।**

यस्तु अविज्ञानवान् भवति अमनस्कः सदाऽशुचिः (भवति) सः तत्पदम् न आप्नोति। संसारं च अधिगच्छति।

यस्त्वविज्ञानवान्भवति।

अमनस्कः अप्रगृहीत-मनस्कः।

सः तत एव अशुचिः सदा एव। न सः रथी तत् पूर्वोक्तमक्षरं यत्परं (१.३.२) पदम् आप्नोति तेन सारथिना।

न केवलं कैवल्यं नाप्नोति, संसारं च जन्म-मरण-लक्षणम् अधिगच्छति।। ७ ।।

**यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः।**

**स तु तत्पदमाप्नोति यस्माद्भूयो न जायते।। १.३.८ ।।**

यस्तु विज्ञानवान् समनस्कः सदा शुचिः भवति सः तु यस्माद्भूयो न जायते तत्पदमाप्नोति।

यस्तु द्वितीयो विज्ञानवान् विज्ञानवत्सारथ्युपेतो रथी, विद्वानित्येतत्।

युक्त-मनाः समनस्कः।

सः तत एव सदा शुचिः।

स तु तत्पदमाप्नोति, यस्माद् आप्तात् पदादप्रच्युतः सन् भूयः पुनः न जायते संसारे।। ८ ।।

किं तत्पदमित्याह -

**विज्ञानसारथिर्यस्तु मनःप्रग्रहवान् नरः।**

**सोऽध्वनः पारमाप्नोति। तद्विष्णोः परमं पदम्।। १.३.९ ।।**

यः नरः विज्ञानसारथिः मनःप्रग्रहवान् सः अध्वनः पारं विष्णोः तत् परमं पदम् आप्नोति।

विज्ञानसारथिः यस्तु यो विवेक-बुद्धि-सारथिः पूर्वोक्तः मनःप्रग्रहवान् प्रगृहीत-मनाः समाहित-चित्तः सन् शुचिः नरः विद्वान्, सः अध्वनः संसार-गतेः पारं परमेव अधिगन्तव्यमित्येतत्।

आप्नोति मुच्यते सर्व-संसार-बन्धनैः।

तद् विष्णोः व्यापन-शीलस्य ब्रह्मणः परमात्मनो वासुदेवाख्यस्य परमं प्रकृष्टं पदं स्थानम्, सतत्त्वम् इत्येतत्। यद् असावाप्नोति विद्वान्।। ९ ।।

अधुना यत्पदं गन्तव्यं तस्य इन्द्रियाणि स्थूलान्यारभ्य सूक्ष्म-तारतम्य-क्रमेण प्रत्यगात्मतया अधिगमः कर्त्तव्य इत्येवमर्थमिदमारभ्यते -

**इन्द्रियेभ्यः परा ह्यर्थाः। अर्थेभ्यश्च परं मनः।**

**मनसस्तु परा बुद्धिः। बुद्धेरात्मा महान् परः।। १.३.१० ।।**

अर्थाः हि इन्द्रियेभ्यः पराः। मनः अर्थेभ्यश्च परम्। मनसस्तु बुद्धिः परा। महान् आत्मा बुद्धेः परः।। १.३.१० ।।

स्थूलानि तावदिन्द्रियाणि।

तानि यैः अर्थैः आत्म-प्रकाशनायारब्धानि तेभ्य इन्द्रियेभ्यः स्व-कार्येभ्यः ते पराः हि अर्थाः सूक्ष्मा महान्तश्च प्रत्यगात्म-भूताश्च।

तेभ्योऽपि अर्थेभ्यश्च परं सूक्ष्मतरं महत् प्रत्यगात्म-भूतं च मनः मनः-शब्द-वाच्यं मनस आरम्भकं भूत-सूक्ष्मं, सङ्कल्प-विकल्पाद्यारम्भकत्वात्।

मनसः अपि परा सूक्ष्मतरा महत्तरा प्रत्यगात्म-भूता च बुद्धिः, बुद्धि-शब्द-वाच्यमध्यवसायाद्यारम्भकं भूत-सूक्ष्मम्।

बुद्धेः आत्मा सर्व-प्राणि-बुद्धीनां प्रत्यगात्म-भूतत्वादात्मा महान् सर्व-महत्त्वाद् अव्यक्ताद् यत्प्रथमं जातं

हैरण्यगर्भं तत्त्वं बोधाबोधात्मकं महानात्मा बुद्धेः परः इत्युच्यते।। १०  ।।

**आनन्दगिरिटीका**

**प्रत्यगात्मभूताश्च** इति। प्रत्यगनपायिस्वरूपभूताः इत्यर्थः। ननु अर्थेभ्यः मनसः आरम्भकं भूतसूक्ष्मं परम्। तस्माद् बुद्ध्यारम्भकं भूतसूक्ष्मं परमिति न युक्तम्। कार्यापेक्षया हि उपादानमुपचितावयवं व्यापकमनपायिस्वरूपं च प्रसिद्धम्। यथा घटादेः मृदादिः। न च इह भूतसूक्ष्माणां परस्पर-कार्य-कारण-भावे मानमस्ति। सत्यम्। तथापि विषयेन्द्रिय-व्यवहारस्य मनोधीनतादर्शनाद् मनः तावद् व्यापकं कल्प्यते। तच्च परामार्थतः एव आत्मभूतमिति केषांचिद् भ्रमः तन्निरासाय उक्तं **मनःशब्दवाच्यं भूतसूक्ष्मम्** इति। अन्नमयं हि सोम्य मनः (छा. ६.५.४) इत्यादिश्रुतेः भौतिकत्वावगमाद् अन्नभावाभावाभ्यामुपचयापचयदर्शनाद् भौतिकमेव तत्। तस्य च संकल्पादि-लक्षणस्य अध्यवसाय-नियम्यत्वाद् बुद्धिः ततः परमिति। बुद्धिश्च आत्मेति केषांचिद् अभिमानः तदपनयनार्थमाह - **बुद्धि-शब्द-वाच्यम्** इति। करणत्वाद् इन्द्रियवद् बुद्धेः भौतिकत्वं सिद्धम्। करणत्वं च स्वबुद्ध्या अहमुपलभे इत्यनुभवात् सिद्धम्। ततो भूतावयव-संस्थानेषु एव अर्थादिषु उत्तरोत्तरं परापरत्वं (परत्वं) कल्प्यं परमपुरुषार्थ-दिदर्शयिषया। न तु अर्थादीनां परत्वं प्रतिपिपादयिषितं प्रयोजनाभावाद् वाक्यभेदप्रसङ्गाच्च इति। सुरनरतिर्यगादिबुद्धीनां विधारकत्वात् सातत्यगमनाद् आत्मोच्यते। सूत्रसंज्ञकं हैरण्यगर्भ-तत्वमित्यर्थः। ज्ञानक्रियाशक्त्यात्मकम्। अथवा अधिकारिपुरुषाभिप्रायेण बोधात्मकत्वम्। अव्यक्तस्य आद्यः परिणामः उपाधिः अपञ्चीकृतभूतात्मकः। तेन रूपेण अबोधात्मकत्वं हिरण्यगर्भस्य इत्यर्थः। (१०)

**महतः परमव्यक्तम्। अव्यक्तात् पुरुषः परः।**

**पुरुषान्न परं किञ्चित्। सा काष्ठा सा परा गतिः।। १.३.११ ।।**

महतः अव्यक्तं परम्। पुरुषः अव्यक्तात् परः। पुरुषात् परं किञ्चित् न (अस्ति)। सा काष्ठा सा परा गतिः।

महतः अपि परं सूक्ष्मतरं प्रत्यगात्म-भूतं सर्व-महत्तरं च अव्यक्तं सर्वस्य जगतो बीज-भूतम्, अव्याकृत-नाम-रूप-सतत्त्वं, सर्व-कार्य-कारण-शक्ति-समाहार-रूपम्, अव्याकृताकाशादि-नाम-वाच्यं, परमात्मन्योत-प्रोत-भावेन समाश्रितं, वट-कणिकायाम् इव वट-वृक्ष-शक्तिः।

तस्माद् अव्यक्तात् परः सूक्ष्मतरः सर्व-कारण-कारणत्वात् प्रत्यगात्मत्वाच्च महांश्च, अत एव पुरुषः सर्व-पूरणात्। ततोऽन्यस्य परस्य प्रसङ्गं निवारयन्नाह - पुरुषान्न परं किञ्चिदिति।

यस्माद् न अस्ति पुरुषात् चिन्मात्र-घनात् परं किञ्चिद् अपि वस्त्वन्तरम्, तस्मात् सूक्ष्मत्व-महत्त्व-प्रत्यगात्मत्वानां सा काष्ठा निष्ठा पर्यवसानम्।

अत्र हि इन्द्रियेभ्य आरभ्य सूक्ष्मत्वादि-परिसमाप्तिः।

अत एव च गन्तॄणां सर्व-गतिमतां संसारिणां सा परा प्रकृष्टा गतिः, यद् गत्वा न निवर्त्तन्ते (गी. १५.६) इति स्मृतेः।। ११ ।।

**आनन्दगिरिटीका**

प्रलये सर्वकार्यकारणशक्तीनाम् अवस्थानमभ्युपगन्तव्यं शब्दार्थसम्बन्धस्य शक्तिलक्षणस्य नित्यत्व-निर्वाहाय। तासां शक्तीनां समाहारो मायातत्वं भवति ब्रह्मणः असङ्गत्वाद् इति शक्ति-समाहार-रूपम् अव्यक्तमित्यर्थः। तद्धेदं तर्हि अव्याकृतमासीत्, एतस्मिन् खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च, मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् (श्वे. ४.१०) इत्यादिश्रुतिप्रसिद्धं च अव्यक्तम्। तस्य सांख्याभिमत-प्रधानाद् वैलक्षण्यमाह - **परमात्मनि** इति। शक्तित्वेन अद्वितीयत्वाविरोधमाह - **वटकणिकायाम्** इव इति। भाविवटवृक्षशक्तिमद्वटबीजं स्वशक्त्या न सद्-द्वितीयं कथ्यते तद्वद् ब्रह्मापि न मायाशक्त्या सद्वितीयम्। सत्वादिरूपेण निरूप्यमाणे व्यक्तिरस्य नास्तीत्यव्यक्तम्। अतः अव्यक्त-शब्दादपि अद्वैताविरोधित्वं द्रष्टव्यम्। सर्वस्य प्रपञ्चस्य कारणमव्यक्तम्। तस्य परमात्मपरतन्त्रत्वात् परमात्मनः उपचारेण कारणत्वमुच्यते, न तु अव्यक्तवद् विकारितया अनादित्वाद् अव्यक्तस्य पारतन्त्र्यं च पृथक् सत्वे प्रमाणाभाद् आत्मसत्तयैव सत्तावत्वाच्च इत्यर्थः। (११)

ननु गतिश्चेदागत्यापि भवितव्यम्, कथं यस्माद्भूयो न जायते (क. १.३.८) इति नैष दोषः।

सर्वस्य प्रत्यगात्मत्वादवगतिरेव गतिरित्युपचर्यते।

प्रत्यगात्मत्वं च दर्शितम् इन्द्रिय-मनो-बुद्धि-परत्वेन। यो हि गन्ता सोऽगतमप्रत्यग्रूपं गच्छति अनात्मभूतं,

न विपर्ययेण।

तथा च श्रुतिः अनध्वगा अध्वसु पारयिष्णवः (इतिहासोपनिषत् १८) इत्याद्या।

तथा च दर्शयति प्रत्यगात्मत्वं सर्वस्य -

**एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते।**

**दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः।। १.३.१२ ।।**

एषः आत्मा सर्वेषु भूतेषु गूढः। (अतः) न प्रकाशते। सूक्ष्मदर्शिभिः त्वग्र्यया सूक्ष्मया बुद्ध्या दृश्यते।
सूक्ष्म-आत्मतत्वं द्रष्टुं शीलं येषां ते तैः।

एषः पुरुषः सर्वेषु ब्रह्मादि-स्तम्ब-पर्यन्तेषु भूतेषु गूढः संवृतः दर्शन-श्रवणादि-कर्मा अविद्या-मायाच्छन्नः।

अत एव आत्मा न प्रकाशते आत्मत्वेन कस्यचित्।

अहो अतिगम्भीरा दुरवगाह्या विचित्रा माया चेयं, यदयं सर्वो जन्तुः परमार्थतः परमार्थ-सतत्त्वोऽप्येवं

बोध्यमानः अहं परमात्मा इति न गृह्णाति।

अनात्मानं देहेन्द्रियादि-सङ्घातमात्मनो दृश्यमानमपि घटादिवद्, आत्मत्वेन अहममुष्य पुत्रः

इत्यनुच्यमानोऽपि गृह्णाति।

नूनं परस्यैव मायया मोमुह्यमानः सर्वो लोको बम्भ्रमीति।

तथा च स्मरणम् - नाहं प्रकाशः सर्वस्य योग-माया-समावृतः (गी. ७.२५) इत्यादि।

**आक्षेपः**

ननु विरुद्धमिदमुच्यते - मत्वा धीरो न शोचति(क. १.२.२२), न प्रकाशते इति च।

**समाधानम्**

नैतदेवम्।

असंस्कृत-बुद्धेरविज्ञेयत्वाद् न प्रकाशते इत्युक्तम्।

दृश्यते तु संस्कृतया अग्र्यया, अग्रम् इव अग्र्या तया, एकाग्रतयोपेतया इत्येतत्।

सूक्ष्मया सूक्ष्म-वस्तु-निरूपण-परया।

कैः सूक्ष्म-दर्शिभिः इन्द्रियेभ्यः परा ह्यर्थाः (१.३.१०) इत्यादि-प्रकारेण सूक्ष्मता-पारम्पर्य-दर्शनेन परं सूक्ष्मं

द्रष्टुं शीलं येषां ते सूक्ष्म-दर्शिनः, तैः सूक्ष्म-दर्शिभिः, पण्डितैरित्येतत्।। १२ ।।

**आनन्दगिरिटीका**

**पारयिष्णवः** इति। संसारपारं गन्तारः इत्यर्थः। न प्रकाशते चेत् तर्हि नास्त्येव इति न वाच्यं लिङ्गदर्शनादित्याह। दर्शनश्रवणादीनि कर्माणि अस्य इति तथोक्तः। जीवस्य प्रकाशत्वे ब्रह्मात्मत्वे सत्यपि योऽयं ब्रह्म-स्वरूपानवभासः स केनापि प्रतिबन्धेन कृत इति कल्प्यते। तच्च प्रतिबन्धकं न वस्तु ज्ञानान्मुक्तिश्रुतेः बाधप्रसङ्गात्। ततोऽविद्यैव प्रतिबन्धिका इत्याह - **अविद्यामायाच्छन्नः** इति। निदिध्यासन-प्रचयेन ऐकाग्र्यमापन्नमन्तःकरणं यदा सहकारि सम्पाद्यते तदा तत्सहकृताद् महावाक्याद् अहं ब्रह्मास्मि इति या बुद्धिवृत्तिः उत्पद्यते तस्यामभिव्यक्तो ब्रह्मभावः इति स्वतोऽपरोक्षतया व्यवह्रियते इति दृश्यत्वम् उपचर्यते। यो हि यत्प्रयुक्तव्यवहारः स तद्दृश्य इति प्रसिद्धम्। (१२)

तत्प्रतिपत्त्युपायमाह -

**यच्छेद् वाङ्मनसी प्राज्ञः। तद्यच्छेज्ज्ञान आत्मनि।**

**ज्ञानमात्मनि महति नियच्छेत्। तद्यछेच्छान्त आत्मनि।। १.३.१३ ।।**

प्राज्ञः वाङ्मनसी (वाचं मनसि) यच्छेत्। तद् (मनः) ज्ञाने आत्मनि यच्छेत्। ज्ञानं महति आत्मनि नियच्छेत्। तद् (महत् तत्वम्) शान्ते आत्मनि यच्छेत्।

यम् १ प.प. नि यम्

**भाष्यम्**

मनसी मनसि। छान्दसं दैर्घ्यम्।

तत् च मनः यच्छेत् ज्ञाने प्रकाश-स्वरूपे बुद्धौ आत्मनि।

बुद्धिर्हि मन-आदि-करणान्याप्नोतीत्यात्मा प्रत्यक् तेषाम्।

ज्ञानं बुद्धिम् आत्मनि महति प्रथमजे नियच्छेत्।

प्रथमजवत् स्वच्छ-स्वभावकमात्मनो विज्ञानमापादयेदित्यर्थः।

तं च महान्तमात्मानं यच्छेत् शान्ते सर्व-विशेष-प्रत्यस्तमित-रूपेऽविक्रिये सर्वान्तरे सर्व-बुद्धि-प्रत्यय-

साक्षिणि मुख्ये आत्मनि ।। १३ ।।

एवं पुरुषे आत्मनि सर्वं प्रविलाप्य नाम-रूप-कर्म-त्रयं यन्मिथ्या-ज्ञान-विजृम्भितं क्रिया-कारक-फल-लक्षणं स्वात्म-याथात्म्य-ज्ञानेन मरीच्युदक-रज्जुसर्प-गगनमलानि इव मरीचि-रज्जु-गगन-स्वरूप-दर्शनेनैव स्वस्थः प्रशान्तात्मा कृत-कृत्यो भवति यतः, अतस्तद्दर्शनार्थम् -

**उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत।**

**क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत् कवयो वदन्ति।। १.३.१४ ।।**

(हे मुमुक्षवः) उत्तिष्ठत जाग्रत वरान् प्राप्य निबोधत। (यथा) क्षुरस्य निशिता धारा दुरत्यया (तथा) कवयः तत् पथः (तं पन्थानं) दुर्गं वदन्ति।। १.३.१४ ।।
दुःखेन अतिक्रमितुं शक्या दुरत्यया। दुःखेन गन्तुं शक्यं दुर्गम्।

अनाद्यविद्या-प्रसुप्ताः उत्तिष्ठत हे जन्तवः, आत्म-ज्ञानाभिमुखा भवत।

जाग्रत अज्ञान-निद्राया घोर-रूपायाः सर्वानर्थ-बीज-भूतायाः क्षयं कुरुत।

कथम् प्राप्य उपगम्य वरान् प्रकृष्टान् आचार्यांस्तद्विदः, तदुपदिष्टं सर्वान्तरमात्मानम् अहमस्मि इति निबोधत अवगच्छत। न हि उपेक्षितव्यमिति श्रुतिरनुकम्पया आह मातृवत्, अतिसूक्ष्म-बुद्धि-विषयत्वाज्ज्ञेयस्य।

किम् इव सूक्ष्म-बुद्धि इत्युच्यते - क्षुरस्य धारा अग्रं निशिता तीक्ष्णी-कृता दुरत्यया दुःखेनात्ययो यस्याः सा

दुरत्यया।

यथा सा पद्भ्यां दुर्गमनीया तथा दुर्गं दुःसम्पाद्यमित्येतत्।

पथः पन्थानं तत् तं ज्ञान-लक्षणं मार्गं कवयः मेधाविनो वदन्ति।

ज्ञेयस्यातिसूक्ष्मत्वात्तद्विषयस्य ज्ञान-मार्गस्य दुःसम्पाद्यत्वं वदन्ति इत्यभिप्रायः।। १४ ।।

**आनन्दगिरिटीका**

क्रमेण एवं विषयदोषदर्शनेन अभ्यासेन च बाह्यकरणान्तःकरण-व्यापार-प्रविलापने सति प्रविलापन-कर्तुः कञ्ञ पुरुषार्थः सिध्यति इत्यत आह - **एवं पुरुष** इत्यादिना। (१४)

तत्कथमतिसूक्ष्मत्वं ज्ञेयस्य इत्युच्यते - स्थूला तावदियं मेदिनी शब्द-स्पर्श-रूप-रस-गन्धोपचिता सर्वेन्द्रिय-विषय-भूता तथा शरीरम्।

तत्रैकैक-गुणापकर्षेण गन्धादीनां सूक्ष्मत्व-महत्त्व-विशुद्धत्व-नित्यत्वादि-तारतम्यं दृष्टमबादिषु यावदाकाशमिति।

ते गन्धादयः सर्वे एव स्थूलत्वाद्विकाराः शब्दान्ताः यत्र न सन्ति, किमु तस्य सूक्ष्मत्वादि-निरतिशयत्वं वक्तव्यमित्येतद्दर्शयति श्रुतिः -

**अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्।**

**अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात् प्रमुच्यते।। १.३.१५ ।।**

यद् अशब्दमस्पर्शमरूपमव्ययम् अरसम् अगन्धवत् तथा नित्यम् अनाद्यनन्तं महतः परं ध्रुवं च तद् निचाय्य मृत्युमुखात् प्रमुच्यते।

न विद्यते आदिः कारणं यस्य सः अनादिः। न विद्यते अन्तं (कार्य) यस्य सः अनन्तः। अनादिश्च असौ अनन्तश्च अनाद्यनन्तः तम्। निचाय्य - निश्चयेन ज्ञात्वा।

अशब्दमस्पर्शमरूपमरसमगन्धवच्च यद् एतद् व्याख्यातं ब्रह्म अव्ययम्।

यद्धि शब्दादिमत्, तद् व्येति।

इदं त्वशब्दादिमत्त्वाद् अव्ययं, न व्येति न क्षीयते।

अत एव च नित्यम्।

यद्धि व्येति, तदनित्यम्।

इदं तु न व्येति, अतो नित्यम्।

इतश्च नित्यम् - अनादि अविद्यमानः आदिः कारणमस्य तदिदमनादि।

यद्ध्यादिमत् तत्कार्यत्वाद् अनित्यं कारणे प्रलीयते यथा पृथिव्यादि।

इदं तु सर्व-कारणत्वादकार्यम्।

अकार्यत्वान्नित्यम्।

न तस्य कारणमस्ति यस्मिन्प्रलीयेत।

तथा अनन्तम् अविद्यमानोऽन्तः कार्यमस्य तदनन्तम्।

यथा कदल्यादेः फलादि-कार्योत्पादनेन अप्यनित्यत्वं दृष्टम्, न च तथापि अन्तवत्त्वं ब्रह्मणः।

अतोऽपि नित्यम्।

महतः महत्तत्त्वाद् बुद्ध्याख्यात् परं विलक्षणं नित्य-विज्ञप्ति-स्वरूपत्वात्।

सर्व-साक्षि हि सर्व-भूतात्मत्वाद् ब्रह्म।

उक्तं हि एष सर्वेषु भूतेषु (क. १.३.१२) इत्यादि।

ध्रुवं च कूटस्थं नित्यं, न पृथिव्यादिवद् आपेक्षिकं नित्यत्वम्।

तद् एवं-भूतं ब्रह्मात्मानं निचाय्य अवगम्य तमात्मानं, मृत्यु-मुखात् मृत्यु-गोचरादविद्या-काम-कर्म-लक्षणात्

प्रमुच्यते वियुज्यते।। १५ ।।

**आनन्दगिरिटीका**

यावद्यावद् गुणापचयः तावत्तावत् तारतम्येन सौक्ष्म्यं दृष्टं पृथिव्यादिषु। परमात्मनि तु गुणानामत्यन्ताभावाद् निरतिशयं सौक्ष्म्यं सिध्यति इत्याह - **स्थूला तावत्** इत्यादिना। (१५)

प्रस्तुत-विज्ञान-स्तुत्यर्थमाह श्रुतिः -

**नाचिकेतमुपाख्यानं मृत्युप्रोक्तँ्सनातनम्।**

**उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते।। १.३.१६ ।।**

मेधावी मृत्युप्रोक्तं सनातनं नाचिकेतम् उपाख्यानं उक्त्वा श्रुत्वा च ब्रह्मलोके महीयते।
यद्ब्रह्म स्वमात्रतया (अभिन्नरूपेण) लोक्यते ज्ञायते इति सोऽयं ब्रह्मलोकः। नचिकेतसा लब्धं नाचिकेतम्। मृत्युना प्रोक्तं मृत्युप्रोक्तम्।

नाचिकेतं नचिकेतसा प्राप्तं नाचिकेतं, मृत्युना प्रोक्तं मृत्यु-प्रोक्तम् इदमाख्यानम् उपाख्यानं वल्ली-त्रय-लक्षणं सनातनं चिरन्तनं वैदिकत्वात् उक्त्वा ब्राह्मणेभ्यः श्रुत्वा च आचार्येभ्यः मेधावी ब्रह्मैव लोको ब्रह्म-लोकः तस्मिन् ब्रह्मलोके महीयते आत्म-भूत उपास्यो भवतीत्यभिप्रायः।। १६ ।।

**य इमं परमं गुह्यं श्रावयेद् ब्रह्मसंसदि।**

**प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते**

**तदानन्त्याय कल्पत इति।। १.३.१७ ।।**

य प्रयतः इमं परमं गुह्यं ब्रह्मसंसदि श्राद्धकाले वा श्रावयेद् तद् आनन्त्याय कल्पते। तदानन्त्याय कल्पते इति।

।। इति प्रथमेऽध्याये तृतीया वल्ली ।।

यः कश्चिद् इमं ग्रन्थं परमं प्रकृष्टं गुह्यं गोप्यं श्रावयेद् ग्रन्थतोऽर्थतश्च ब्राह्मणानां संसदि ब्रह्मसंसदि प्रयतः शुचिर्भूत्वा श्राद्धकाले वा श्रावयेत् भुञ्जानानां, तत् श्राद्धम् अस्य आनन्त्याय अनन्त-फलाय कल्पते सम्पद्यते। द्विर्वचनमध्याय-परिसमाप्त्यर्थम्।। १७ ।।

इति तृतीयवल्लीभाष्यम्।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ

काठकोपनिषद्भाष्ये प्रथमोऽध्यायः।।